सरल सुबोध 'मणिप्रभा' हिन्दी टीका तथा 'अमरकौमुदी' संस्कृत टिप्पणीके सहित

# अमरकोष ( सम्पूर्ण ) ।

( टीकाकार—व्याकरण-साहित्याचार्य साहित्यरत्न श्रीहरगोविन्द मिश्रजी, काशी )

'मणिप्रभा' नामक हिन्दी व्याख्यामें—मूल श्लोकोंके पर्याय (नाम), सन्दिग्ध शब्दोंके शुद्ध ( प्रातिपदिकावस्थाका ) स्वरूप ( जैसे—राजा = राजन् , विद्वान् = विद्वस्,…… ), लिङ्ग, पाठान्तर और मतान्तरके पर्याय, अन्य ग्रन्थों या कोषोंमें मिलनेवाले आंशिक समानाकार बाहरी शब्द, तथा हिन्दीमें अर्थ दिये गये हैं और कठिन विषय उदाहरणादिसे विशद किये गये हैं । क्षेपक श्लोकों· की व्याख्या भी मूलके समान ही विशद रूपसे की गई है ।

'अमरकौमुदी' नामक संस्कृत टिप्पणीमें—वेद, वेदाङ्ग, स्मृति, पुराण और साहित्यादि अनेक ग्रन्थोंसे प्रमाण-वचन, पाठान्तर आदि, तथा अक्षौहिणी सेना, मन्वन्तर काल, द्रोण खारी आदि प्रमाण ( तौल ) इत्यादिके अनेक चक्र भी दिये हैं जिनसे अनेक श्लोकोंके आशय अनायास ही समझ में आ जाते हैं । परिशिष्टमें विशेष आवश्यकीय विषय तथा अन्तमें मूल, क्षेपक और समानाकार या पाठान्तर आदि बाहरी शब्दोंकी अकारादि क्रमसे सूची और ग्रन्थारम्भमें गवेषणापूर्ण विस्तृत भूमिका देकर ग्रन्थको परमोपयोगी बनाया गया है । कागज छपाई आदि सब कुछ अत्युत्तम रहनेपर भी मूल्य लागतमात्र सजिल्द पुस्तक का केवल २)

# अमरकोष ( प्रथमकाण्ड ) ।

'मणिप्रभा' हिन्दी टीका अमरकौमुदी टिप्पणी सहित

बिहारके प्रथमा परीक्षार्थियोंके लिए हमने इसके प्रथम काण्डका उपरोक्त संपूर्ण विषयोंसे युक्त पृथक् संस्करण भी छापा है । मूल्य ।) मात्र

# अमरकोष-मूल ( गुटका )

अनेकार्थध्वनिमञ्जरी-द्विरूपकोश-एकाक्षरकोश सहित ।

४॥ × ५ इंच का जेबी गुटका । मूल्य बहुत अल्प ।)

---

प्रकाशक—चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।

THE

HARIDAS SANSKRIT SERIES
70

# PRAYOGA S'ĀSTRĀRTHA KALĀ

( OF PAṆINĪ VYĀKARAṆA )

By

*Panditaraja S'ri Venimadhava S'ukla*

EDITED WITH THE PRADIPA NOTES, by

Pandit Sri Rajanarayana S'ukla.

# प्रयोगशास्त्रार्थकला

घटिकाशतकशतावधानसंस्कृताशुकविप्रसिद्धशास्त्रार्थवैयाकरणशिरोमण्या-
द्यनेकपदवीकककविचक्रवर्त्ति—

पण्डितराज शुक्लश्रीवेणीमाधवशास्त्रिणा रचिता ।
तदात्मजेन शुक्लश्रीराजनारायणशास्त्रिणा नैयायिकेन

उपयुक्त"प्रदीप"टिप्पणैर्विभूष्य सम्पादिता ।

PUBLISHED BY

JAYA KRISHNA DĀS HARI DĀS GUPTA

*The Chowkhambā Sanskrit Series Office.*

Benares City.

1938

[ *All Rights Reserved by the Publishers.* ]

CHOWK. SANS. SE... OFFICE
Price
Rs. 1/-
BENARES

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 6530
Date 16.4.65
73 ... 491.25
Su 47 I

## वक्तव्यविशेषः

अयि भोश्शब्दशास्त्रसिद्धान्तपीयूषपानपरायणा मान्या विद्वांसश्शास्त्रार्थकलापटीयांसो भावुकाश्छात्रबन्धवश्च! नेदमस्ति प्रच्छन्नतमम्भवतां सुरभारतीसमाराधनसंसक्तमानसानाम्प्रतिपलमभिनवप्रयोगविचारचिकीर्षुशेमुषीकाणां यत् पारम्पर्यक्रमागतानामशुद्धानामपि प्रयोगाणां समुच्चारणे न कस्यापि दृष्टिस्सावधानतामाप्नोति। अत एव शाब्दिकदशाऽशुद्धानामपि भूरिशः प्रयोगाणां जायते तत्र २ दर्शनम्। त्रुटिमेनान्दूरीकर्त्तुकामेन व्युत्पत्तिवादाद्यनेकग्रन्थशास्त्रार्थकलाकर्त्रा सुप्रसिद्धाभिधेयेनास्मत्तातचरणेन पण्डितराजशुक्ल श्रीवेणीमाधवशास्त्रिणाऽनेकग्रन्थलिखनाद्यासक्तचेतसाऽपि बहुतरमन्विष्य विचार्य च प्रयोगशास्त्रार्थकलैषा विनिर्मिता। साचेयं यथामति परिष्कारदर्पणादिवत् उचित "प्रदीप" टिप्पणैः परिष्कृत्य संशोध्य च मया श्रीमतामुपहारीक्रियते। आशास्यते मानवस्वभावात् सम्भवतान्दोषाणां क्षमापनेन विदुषां सेवकोऽयमनुगृहीतस्स्यादिति।

वै० शु० अक्षयतृतीया १९९५ वै०
ग० सं० कालेज
काशी

भवदीयस्य—
श्रीराजनारायणशुक्लस्य
[ नैयायिकस्य ]

PRINTED BY
JAYA KRISHNA DAS GUPTA,
VIDYA VILAS PRESS, BENARES CITY.
1938.

सर्वविधपुस्तक-प्राप्तिस्थानम्—
जयकृष्णदास-हरिदास गुप्तः-
चौखम्बा संस्कृत सीरिज आफिस,
विद्याविलासप्रेस, बनारस सिटी।

Library
IIAS, Shimla
PH 491.25 Su 47 P
00006530

# प्रयोगशास्त्रार्थकला ।

ध्यात्त्वा वाणीं स्वान्तनिष्ठकर्ममात्रप्रपूरिकाम् ।
प्रयोग शास्त्रार्थकलां कुर्वे शास्त्रिप्रमृष्टये ॥ १ ॥
शब्दसाधुत्त्वसम्पन्ना प्रक्रियाऽद्य तु दुर्लभा ।
तस्या विवृद्धयेऽजस्रं पण्डितानां सुखाय च ॥ २ ॥
काशीप्रयागावधमध्यवर्त्ती,
कृतश्रमश्शास्त्रनिकुञ्जपुञ्जे ।
ग्रन्थञ्च सत्सम्मतिसम्मतञ्च
सताम्प्रमोदाय तथा विभूत्यै ॥ ३ ॥
सरयूपारीणशुक्लो वेणीमाधवनामकः ।
मामखारग्रामजातो गर्गवंशसुधीसुधः ॥ ४ ॥
गोमतीदक्षिणे कूले सतीनद्यास्तथोत्तरे ।
काशीप्रयागायोध्याख्यत्रिकोणयन्त्रसज्जनिः ॥ ५ ॥

## अत्रेति—

एतस्मिन्निति (१) अत्रेति एतच्छब्दात् त्रल्प्रत्ययः । अस्मिन्निति अत्रेति

---

(१) ध्यात्वा वाणीं स्वान्तनिष्ठकर्ममात्रप्रपूरिकाम् ।
टिप्पणीं कर्त्तुमारेभे पितुराज्ञावशंवदः ॥ १ ॥
श्रीराजनारायणशर्मशुक्लो न्यायप्रभाभासितशेमुखीकः ।
प्रदीपकाख्येन सुटिप्पणेन विचारधौत्या धवलीकृतेन ॥ २ ॥
प्रयोगशास्त्रार्थकलाप्रबन्धःकृतश्च पित्रा मम पण्डितेन ।
तत्रास्ति या सूक्ष्मगतिस्त्वगम्या न्याय्यम्प्रकाशम्प्रकरोमि तस्याः ॥३॥
एतच्छब्दात् "सप्तम्यास्त्रल्" इति त्रलि "एतदोऽन्" इति सूत्रे "अन्" इति

वदन्तो भ्रान्ताः । इदं शब्दात त्रप्रत्यये तु इदमोह इत्यस्यैव प्रवृत्तेः इहेति ।

षाण्मासिकोऽत्रावधिरिति श्रूयते तत्रैव विचारः "अवयसि ठंश्चेति" पाणिनिसूत्रबलेन कालविशेषनिर्णये ठक् न भवति किन्तु ठनेव यद् वा । एवञ्च ठनि षण्मासिक इति वृद्धिरहित एव प्रयोगस्तथाच छन्दोभङ्गभीत्या कथन्नरपतिसभायां षाण्मासिक इति त एव जानन्तु ।

## त्रिफला इति त्रिफली इति वा ?

त्रयाणां फलानां समाहार इति विग्रहे "अकारान्तोत्तरपदो द्विगुस्स्त्रियामिष्टः" इति भाष्येष्टया स्त्रीत्वे सिद्धे "त्रेश्च द्विगौ ङीषऽप्रतिषेधो वक्तव्य" इति वार्त्तिकेन भाष्योक्तेनोपलक्षणत्वान्ङीषङीपोऽप्रतिषेधाद्वार्त्तिकेनाऽपूर्वटाब्विधायकेन टापि त्रिफलेति टाबन्तरूपसिद्धिः । नच "नमुने" इति टायामादेशोऽजायाम्छागेति(१)भाष्यप्रयोगादेरजादेराकृतिगणत्वेनाजादित्वा-

---

योगविभागाद् भाष्यसम्मतात् एतच्छब्दस्य अनादेशस्स्यात् प्राग्दिशीये परे इत्यर्थकात् अनेकाल्त्वात् एतदःसम्पूर्णस्य अन् इत्यादेशे "नलोपः प्रातिपदिकान्तस्य" इति नलोपे अत्रेति सिध्यति । एवमेव अस्मादिति अतः इत्येवम् प्रयुज्यमानमपि अशुद्धं किन्तु एतस्मादिति अतः, एतच्छब्दात्तसिल्, एतदोऽनादेशः नलोपः । अस्मादिति विग्रहे तु इदंशब्दात् तासिल्प्रत्यये "इदम इश्" इतीशादेशे इत इत्येव रूपमित्यनुसन्धेयम् ।

(१) भाष्ये हि "न मु टादेशे सिद्धो वक्तव्यः" इति वार्त्तिकविचारावसरे टादेशे इत्यत्र टायामादेशष्टादेश उत टाया आदेशष्टादेश इति प्रदर्शितम् । तत्र कौमुदीकारादिरीत्या "सप्तमी शौण्डैः" इत्यत्र सप्तमी इति योगविभागप्रयुक्तसप्तमीसमासानङ्गीकारे टायामादेश इति विगृह्य कथं टादेशशब्दस्य सिद्धिरिति भाष्यवचनात् सप्तमी इति योगविभागोऽवश्यमेव मान्यः ।

नच तथा सति "सिद्धशुष्कपक्वबन्धैश्च" इत्यादीनां वैयर्थ्यापत्तिरिति वाच्यम् ? इष्टापत्तेर्लाघवानुसन्धानेन तेषामकर्त्तव्यत्वात् । भाष्ये "अधिशब्दोऽत्र पठ्यते" इति रामाधीना इत्यादिसिद्धयेऽपूर्ववक्तव्यस्यानाश्रयणीयत्वाद् विशिष्टलाघवात् तादृशभाष्यस्यैकदेशयुक्तित्वकल्पनात् । "द्वितीया" तृतीया" इत्यादियोगं विभज्य समासमङ्गीकुर्वतां भाष्यकृतां "सप्तमी" इत्यत्र योगविभागे कथं विप्रतिपत्तिः ? सूत्रादिवैयर्थ्यन्तु यथोत्तरम्मुनीनाम् प्रामाण्यानुरोधात् सोढव्यमेवेति नवीनाः ।

देव टाप्सिद्धौ नापूर्ववार्त्तिकाश्रयणमिति वाच्यम् ? सर्वत्राकृतिगणत्वस्वीकारे प्रमाणाऽभावात्सूत्रान्तरवैयर्थ्यापाताद् भाष्यस्थवार्त्तिकस्य त्रिफलेत्युदाहरणस्य भाष्यकृता स्वयं प्रदर्शितत्वाच्च ।

एवञ्च त्रिफलेति टाबन्त एव । अजादित्वात्त्रिफलेति मूलन्तु सर्वथैव भ्रान्तिमूलकम् ।

एकां लज्जाम्परित्यज्य त्रिलोके विजयी भवेदिति वाक्ये त्रिलोक्यामिति त्रिलोक इति वा शब्द इति प्रश्नः ।

त्र्यवयवो लोकस्त्रिलोक इति विगृह्य लोकशब्दो लोकसमुदायपरः शाकपार्थिवादेराकृतिगणत्वेन मध्यमपदलोपात्त्रिलोक इति सिद्धयति, त्रित्वविशिष्टो लोकः त्रित्वसंख्याविशिष्टो लोकस्त्रिलोक इति वा । अत एव त्रिलोकशब्दस्य संज्ञात्वाभावेन 'दिक्संख्ययोस्संज्ञायामि'ति नियमात्कथं कर्मधारय इत्यपि निरस्तम् । समासप्रकरणे "दिक्संख्ये संज्ञायामि"ति नियमस्य प्रायिकत्वाच्च ।

अत एव त्रिवली षडानना पीतपयोधरासु–नवरसरुचिरां निर्मितिम् , पञ्चाप्सरोयौवनकूटबन्धम् इत्यादीनां सिद्धिः ।

अत एव त्रिलोकनाथेन सदा मखद्विष इति रूपमपि सिद्धयति ।

नच त्रयाणां लोकानां नाथ इति विगृह्य तद्धितार्थेति समास इति वाच्यम् ? त्रिपदतत्पुरुषस्य दुर्लभत्वात ।

## ज्येष्ठमास इति न किन्तु ज्यैष्ठमास इति ।

ज्यैष्ठमासस्स्मृतश्शुक्रश्शुक्रो दैत्यपुरोहित इत्यनेकार्थध्वनिमञ्जरीकोशात् ।

किञ्च "नक्षत्रेण युक्तः कालः साऽस्मिन्पौर्णमासी"ति पाणिनिसूत्राभ्यां ज्यैष्ठ इत्येव रूपम् । तथाहि–ज्येष्ठानक्षत्रेण युक्ता पूर्णिमा ज्यैष्ठी, ज्यैष्ठी पूर्णिमाऽस्मिन्मास इति(१)ज्यैष्ठो मास इति अणन्तत्वान्ङीप् तदन्तात्पुनरण् ।

---

(१) अत एव प्रथमकाण्डे कालवर्गे "स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः । वैशाखे माधवो राधो ज्यैष्ठे शुक्रः शुचिस्त्वयम्" इति पाठोऽमरकोषे । वयः परत्वे च प्रसङ्गात् "त्रिषु ज्येष्ठोऽतिशस्तेऽपि कनिष्ठोऽतियुवाल्पयोः" इति तृतीयकाण्डे नानार्थवर्गेऽमरः । अत्र किञ्चित्–यदि मासपरत्वेऽपि ज्येष्ठ इत्यागृह्यते भवद्भिस्तदाऽन्येन वैशाखः चैत्र इति चोच्चार्यमाणे किं वक्तव्यं स्याद् ? विनिगमनावैकल्याच्चोभयत्र ( सर्वत्र ) वृद्धिस्समेति ।

माघे धनवती कन्या फाल्गुने सुभगा भवेत् ।
वैशाखे च तथा ज्येष्ठे पत्युरत्यन्तवल्लभा ॥ इति ज्योतिश्शास्त्रीयश्लोके ज्येष्ठमास इति पदमशुद्धमेव । कर्मकाण्डादिसङ्कल्पवाक्येऽपि ज्येष्ठे मासि शुक्ले पक्ष इति कथनं भ्रममूलकमेवेति सरयूपारीणशुक्लाः ।

## रूपवती पृथिवीति—

ननु रूपादिपदार्थानां न्यायशास्त्रोक्तचतुर्विंशति गुणस्थत्वात् "गुणवचनेभ्यो मतुपो लुगिष्ट" इति वार्त्तिकेन शुक्लो घट इतिवन्मतुपो लुक् स्यादिति चेन्न ? "रसादिभ्यश्चे"ति स्वतन्त्रमतुब्विधायकसूत्रेण मतुपि रूपवतीति सिद्धेः एतत्सूत्रारम्भ-(१)सामर्थ्याद् "गुणवचन" इति वार्त्तिके "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती"ति कोशोक्तानां शुक्लनीलहरितपीतरक्तकपिशचित्राणामेव सप्तानां ग्रहणात् ।

नच रूपिणी कन्या, रसिको नट इति प्रयोगयोः कथमिन्यादिरिति रसादिगणे रूपरसपाठादिति वाच्यम् ? तत्र सूत्रे गुणादिति गणवार्त्तिके रूपरसादीनां ग्रहणेन रूपशब्देन सौन्दर्य्यमात्राभिधानाद् रूपिणीतिसिद्धेः । रसिक इत्यत्र तु रसशब्देन भावमात्रबोधेनेष्टसिद्धेः । तथाच रूपवती पृथिवीत्येव न तु लुकि रूपा पृथिवीति ।

## ब्राह्मणान्भोजयिष्यामि—

अत्रायम्परामर्शः तत्तत्कर्मकाण्डपद्धतौ ब्राह्मणान्भोजयिष्ये इत्यात्मनेपदं लिखितन्तन्नयुक्तम् ? "निगरणचलनार्थेभ्यश्चे"ति सूत्रेण(२)परस्मैपदविधानात् ।

---

एवञ्च मासपरत्वे ज्यैष्ठ इति वृद्धिघटितं वयःपरत्वे च ज्येष्ठ इति ( अतिशयेन प्रशस्य इति विग्रहे प्रशस्यशब्दस्य "ज्य च" इति शास्त्रेण ज्यादेशे इष्ठनि च गुणेन निष्पद्यते ) गुणघटिते न विवादो विधेयः । अत एव तत्र २ वाचस्पतिमिश्रादयोऽपि "प्रत्यक्षस्य सर्वप्रमाणेषु ज्येष्ठत्वात् तदधीनत्वाच्चानुमानादीनां सर्ववादिनामविप्रतिपत्तेश्च" इत्यूचुः ।

( १ ) सूत्रवैयर्थ्याद् गुणत्वसाक्षाद्व्याप्यरूपत्वव्याप्यजातिमतामेव "गुणवचन" इति वार्त्तिके ग्रहणम् । एवञ्च गुणत्वसाक्षाद्व्याप्या या रूपत्वादिजातिस्तद्व्याप्या या शुक्लत्वपीतत्वादिजातिस्तदवच्छिन्नानां शुक्लादिशब्दानामेव सप्तानां ग्रहणेन रूपवतीत्यादौ रूपस्य गुणत्वसाक्षाद्व्याप्यव्याप्यजातिमत्त्वाभावेन न दोषः ।

( २ ) अत एव निगरणम्भोजनं गलविलाधस्संयोगानुकूलो व्यापार इति हृदि-

प्रकरणे तत्रैव बोधानुभवस्य तत्तत्प्रकरणविषयत्वाच्च। तस्माद् ब्राह्मणान्भोजयिष्ये इत्यात्मनेपदं प्रयुञ्जानाः प्रत्यवयन्त्येवेति सरयूपारीणशुक्लाः।

## सौत्रम्पुंस्त्वमिति--

नन्वत्र त्वप्रत्यये जाते "ह्रस्वात्तादौ तद्धित" इति सुत्रेण षत्वे च पुँष्ट्वमिति कुतो नेति प्रश्नः। "न रपर सृपि सृजि स्पृशि स्पृहि सवनादीनामि"ति षत्वनिषेधकवार्त्तिकीयसवनादिगणे पाठेन षत्वनिषेधात्।

## भ्रातुष्पुत्रः भ्रातुर्जः भ्रातुर्दारा इति--

एषु "ऋतो विद्यायोनिसम्बन्धेभ्य" इति अलुग्विधानात् भातृपुत्रः भ्रातृजः भ्रातृदारा इत्यादयो न भवन्तीति विचार्य्याः।

## पुरतःकृत्वेति--

उपनयनपद्धत्यादौ प्रणीतापात्रं पुरतःकृत्वा, आत्मीयच्चरणं दधाति पुरत इति, स्यात्पुरः पुरतोऽग्रत इति, पुरतो हरिणाक्षीणामेष पुष्पायुधीयतीत्यादयः कथं प्रयोगाः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिगित्यर्थे "पूर्वाधरावराणामसिपुरधवश्चैषामि"ति "अस्तातिचे"ति सूत्राभ्यां पुरःपुरस्तादित्येव भवतो नतु पुरस्तादिति प्रश्नः?

"दक्षिणोत्तराभ्यामतसुजि"ति सूत्रे तसुविधानेनेष्टसिद्धौ अकारविशिष्टविधानमन्यतो विधानार्थमत एव पुर अग्रगमन इति धातो "मूलविभुजादिभ्यः क" इति कप्रत्यये कान्तादतसुचि पुरत इति सिद्धेः।

---

कृत्य निगरणार्थकानाम् आशयति, निगारयति, भोजयति' इति स्पष्टमेव भोजेरुपादानं सङ्गच्छते कौमुदीकृताम्।

नच तथा सति "इमां किमाचामयसे न चक्षुषी" इत्यत्राऽचमनस्यापि निगरणार्थकत्वेन परस्मैपदस्यैव युक्तत्वे श्रीहर्षोक्तिः कथमिति वाच्यम्? तत्र आचामयतेः सादरज्ञाने लाक्षणिकतया निगरणार्थत्वाभावादिति समाधानात्। आचामयते इत्यत्र वृद्धिस्तु "नोदात्तोपदेशस्य मान्तस्यानाचमेः, अनाचमिकमिगमीनामिति वक्तव्यम्" इत्यादिकौमुद्युक्तदिशाऽनुसन्धेया।

## वत्सतरीति--

कर्मकाण्डीयवृषोत्सर्गप्रकरणे वत्सतरीचतुष्टयसहितं वृषभं पूजयेदित्युपक्रमः। तत्र वत्सशब्दादतिशयेन वत्सेति विग्रहे "द्विवचनविभज्योपपदे तरबीयसुनावि"ति तरपि पश्चाट्टापि वत्सतरेति रूपन्नतु वत्सतरीति प्रश्नः? "कासुगोणीभ्यां ष्टरजि"ति प्रकरणे "वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे" इति वार्त्तिकेन ष्टरच्प्रत्यये "षिद्गौरादिभ्यश्चे"ति ङीषि वत्सतरीति सिद्ध्यति।

अत्र सरयूपारीणशुक्लाः-"अवीलक्ष्मीतरीतन्त्रीधीह्रीश्रोणामुदाहृत" इति बलेन तॄ प्लवनतरणयोरिति धातुः "अवितॄस्तृ ईः" औणादिकसूत्रम्। तारयतीति तरीः अन्तर्भावितण्यर्थः। "स्यात्तरिस्तरणिस्तरी"तिकोशश्च।

एवञ्च वत्साशब्दस्य तरीशब्देन वत्सा चासौ तरीति कर्मधारयसमासे पुंवद्भावेन वत्सतरीति सिद्ध्यतीति वदन्ति।

## स्वार्थिक इति—

स्वस्याः प्रकृतेरर्थे भवस्स्वार्थिक इति। "अध्यात्मादेष्ठञिष्यत" इति वार्त्तिकेन ठञि स्वार्थिक इति। अत्र "न य्वाभ्यामि"त्यैच् तु न भवति? "द्वारादीनाञ्चे"ति द्वारादिगणे स्वग्रामस्वाध्याययोः पाठेन (१)स्वशब्दादेवचेदेतयोरेवेति नियमात्।

## उभयतः पाशा रज्जुरिति—

स्पशबाधनस्पर्शनयोरिति धातोर्भौवादिकात् कृदन्तीयप्रत्यये टापि उभयतस्स्पाशेत्येव रूपन्नतु पविशिष्टम्। पश बन्धने चौरादिकः तस्मात्तु उभयतःपाशेत्यपि।

स्पश ग्रहणसंश्लेषणयोरित्यस्मात्तु न? अर्थाऽसंघटनात्। "याप्ये पाशबि"ति पाशप्प्रत्ययस्तु न भवति? अर्थासङ्गतेः।

---

(१) एवञ्च एतादृशनियमेनैव स्वापतेयमित्यादावपि स्वाराज्यादिवत् ऐजागमविरहे सिद्धे तदर्थं "स्वागतादीनाञ्च" इति ऐज्निषेधके स्वपतिशब्दस्य पाठो व्यर्थ एवावलोक्यते। अपरे तु तथैव स्वागतस्वाध्वरस्वङ्गशब्दानामपि पाठं व्यर्थमेवामनन्ति। सर्वथा "स्वागतादीनाञ्च" इति सूत्रवैयर्थ्यन्तु न? व्यङ्गस्यापत्यं व्याङ्गिः व्यडस्यापत्यं व्याडिरित्यादिषु "न य्वाभ्याम्" इति प्राप्तस्यैजागमस्य निषेधाय तदावश्यकत्वात्।

वस्तुतस्तु [संज्ञावाचकोऽयं शब्दः, विग्रहमात्रमेव, नार्थविचार इति उभयतः पाशेत्स्येवेति सरयूपारीणशुक्लाः ।

## अनेकशब्द एकवचनान्त एवेति—

"अनेकमन्यपदार्थे" इति पाणिनिसूत्रम् । अनेका नदी गङ्गां यमुनाञ्च प्रविष्टेति "येन विधिरिति" सूत्रभाष्यम् । सेव्यतेऽनेकया सन्ततापाङ्गयेति ४ सर्गे माघः । इत्यनेक इव स्म स्वाद्यते युवतिभिर्मधुवार इति ९ सर्गे किरात इत्यादिप्रमाणात् ।

नच अनेके समवायिन इति कारिकावलीप्रयोगः, भवन्त्यनेके जलधेरिवोर्मयः, उद्धतैर्निभृतमेकमनेकैरिति च कथम् ?

किञ्च नञर्थभेदाश्रयप्राधान्याद् बहुवचनं युक्तमिति वाच्यम् ? एकशब्दस्यैकशेषे एके इति पश्चान्नञा समासे अनेके इति बहुवचनान्तसिद्धेः । एवञ्चैकवचनान्तोऽनेकशब्द इति निश्चयः ।

## स्वाराज्यमिति—

स्वराज्यशब्दात्तद्धितीयाण्प्रत्यये वृद्धौ च स्वाराज्यमिति ।

ननु सौवश्व इतिवत् "न य्वाभ्यामि"तिप्र वृत्त्यैजागमे सौवराज्यमिति चेन्न ? "द्वारादीनाञ्चे"ति द्वारादिगणे स्वग्रामस्वाध्याययोः पाठेन स्वशब्दादेरचेदेतयोरेवेति नियमेनैजागमाऽप्रवृत्त्या लक्ष्यसिद्धेस्सौष्ठवात् ।

सागरं तर्तुकामस्येति भाष्यप्रयोगादसति बाधके प्रमाणानां सामान्ये पक्षपात इति न्यायेनागमशास्त्रस्यानित्यत्वकल्पनाच्च ।

अत एव राजयक्ष्मपरिहाणिराययौ कामयानसमवस्थयाऽतुलाम्, यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः" अत्र कामयान ईरयाण शब्दौ रघुवंशभागवतोक्तौ "आने मुगि"ति शास्त्रीयमुगागमोनित्यत्वादेव सिद्धावित्यलम् ।

## अमुक इति न भवति--

शुद्धस्य अदश्शब्दस्य असाविति अद इति च । साकच्कस्य तु असकौ असुक इति । अत एव सङ्कल्पकवाक्ये अमुकशर्मा अमुकी देवीति न भवति, किन्तु अदश्शर्मा अदो देवीत्येव समस्तं पदम् । अत एव पारस्करगृह्यसूत्रे अदश्शर्मेति असौ शर्मेत्येवोक्तम् ।

स्मृतिकारास्तु अमुकाऽमुकगोत्रैतत्तुभ्यमन्नं स्वधा नम इति प्रयुञ्जत एवेति ।

## अत्र सरयूपारीणशुक्लाः--

अमुकशब्दस्स्मृतिलभ्योऽमुकी देवीति व्यवहारलभ्यश्चाव्युत्पन्न इति न प्रक्रियाविवाद इति वदन्ति ।

## एको वृक्षः पञ्च नौका भवतीति--

प्रकृतिर्विकृतिर्वापि यत्रास्तित्वं द्वयोरपि ।

गृह्णाति प्रकृतेस्संख्याम्वाचको विकृतेर्नतु ॥

इति शिष्टोक्त्या एको वृक्षः पञ्च नौका भवतीत्येव रूपन्नतु विकृतिगतसंख्यातात्पर्येण भवन्तीति ।

## एको द्वौ जायत इति--

चन्द्रादौ द्वित्वस्य चन्द्रद्वयस्य वाऽऽरोपस्थले उभयाऽभेदारोपप्रतीत्या एको द्वौ जायत इत्येव न तु एको द्वौ जायेते इति ।

## अमुम्पुरः पश्यसीति--

नन्वत्र "नमस्पुरसोर्गत्योरि"ति सूत्रेण सत्वं कुतो नेति प्रश्नः? पुरस्थितं देवदारुमिति तात्पर्येण स्थितेति क्रियां प्रत्येव पुरसो गतित्वात् ।

नच "पुरोऽव्ययमि" त्यत्र कृजस्सम्बन्ध इति वाच्यम् । तुरासाहम्पुरोधायेति कुमारसम्भवीयवाक्ये समासल्यबभावापत्तेः ।

## अलङ्कृत्येति--

क्वचिदुपनयनपद्धतौ सशिखकृतक्षौरं यथा शक्त्यलङ्कृत्वेति पाठस्स च न युक्तः?

"भूषणेऽलमि"ति पाणिनिसूत्रेणालंशब्दस्य गतिसंज्ञायां समासे "कुगतिप्रादय" इत्यनेन ल्यपि अलंकृत्येति सिद्ध्यति । नतु अलंकृत्वेति क्त्वान्तम् ।

## तत्रैव सशिखकृतक्षौर इति—

कृतं क्षौरं येनासौ कृतक्षौरः शिखया सहितस्सशिखः सशिखश्चासौ कृतक्षौर इति सशिखकृतक्षौर इति । अर्थात् क्षौरम् कीदृशम् शिखासंयुक्तम् क्षौरे कृतेऽपि शिखास्थितिरिति यावत् ।

शिखासंस्कारे नष्टे केवलेन ब्रह्मसूत्रसंस्कारेण न द्विजत्वमपि तु शिखासूत्राभ्यामेव, अतः क्षौरे शिखारक्षा कर्तव्यैवेति ।

## सम्बोधनान्तवाक्यस्य टेरेव प्लुतसंज्ञा—

वाक्यान्तसम्बोधनस्य टेरेव प्लुतसंज्ञाप्रयुक्तप्लुतविधानम् नान्यस्य । तेन सक्तून् पिव देवदत्ता ३ इत्यत्र भवति न तु देवदत्त सक्तून्पिबेत्यत्रेति ।

अत्र शेखरकाराः—दूरादाह्वानञ्च दूराद्बोधनस्याऽप्युपलक्षणम् न तु केवलसम्बोधनस्येत्यादि । तन्न? सम्बोधनवाक्यम्बिना प्लुतस्य कुत्राऽप्यदृष्टत्वात् भोःशब्दपर्य्यायभवच्छब्दघटितस्य आगच्छतु भवान् देवदत्त इत्यादिवाक्यस्यापि सम्बोधनाभिधायकत्वात् प्लुतस्य वात्सी वन्धुरिति नोदाहरणमपितु वात्सी वन्धो इति शब्दकौस्तुभकाराः।

अत एव एकश्रुतिदूरात्सम्बुद्धावित्यनेनास्य समानविषयकत्वं सङ्गच्छते । काशिकायामपि आह्वानं सम्बोधनमेवेति स्पष्टम् । अयमेवाभिप्रायः पदमञ्जरीकाराणामपि । तथा च नागेशो दुराग्रहग्रस्त इत्यलम् ।

## अकच् इति—

अकच्प्रत्ययविशिष्टेऽपि यदागमन्याय॒प्रवर्त्ततेऽकचोऽप्यागमत्वात् ऐत् अकैदित्यत्र यदागमन्यायेनाकैदित्यस्य पदत्वेन प्रत्यङ् अकैदिति योजने नवीनमते ङमुट् , तिङन्तपदत्वेन "तिङतिङ" इति निघातः, प्रत्ययान्तत्वेन प्रादिपदिकत्वाभावश्च सिद्धयन्ति ।

## तिरस्क्रियेति—

ननु "अनादर॒परिभव॒परीभावस्तिरस्क्रिये"ति वाक्ये तिरस्कृतस्तस्य जनाभिभाविनेति वाक्ये च कथं सत्वं तिरसो गतित्वाभावात् इति प्रश्नः ? नच "तिरसोऽन्यतरस्यामि"ति सूत्रे गतिग्रहणन्नानुवर्त्तत इति न दोष इति वाच्यम् ? तिर॒कृत्वा काष्टं गत इति वक्रीकरणार्थेऽपि सत्वापत्तेः । अनादृतो ह्यन्तर्हितो भवति अन्तर्द्धेरुपचारात् कथञ्चि "तिरोऽन्तर्द्धौ" विभाषा कृञी"ति सूत्राभ्यां गतित्वात् तिरस्क्रिया तिरस्कृत इत्यादिरूपसिद्धेः ।

## वैयाकरणमते निषेधार्थकमाशब्दो नास्तीति—

"आङ् माङोश्चे"ति सूत्रभाष्यम् माङो विशिष्टस्य सानुबन्धकस्य ग्रहणङ्किमर्थम्, आ छायामानयति प्रमाच्छत्रमित्यादौ माभूदिति एतादृशभाष्येण निषेधार्थकमाशब्दो वैयाकरणमते नास्तीति । भाष्यविरोधान्माभवतु माभविष्यतीत्याद-

योऽयुक्ता एव। काव्यादावुपलब्धाश्च निरर्थका एव। लोके संस्कृतभाषणादौ आभूत् मा कार्षीत् इत्येवमेव प्रयोक्तव्याः। मागच्छ गेहं स्वकमित्यादि भ्रान्तिमूलकमेव।

## एकारान्तसुधेशब्दस्सुकाशब्दश्च—

सुधे सुधे वारिवधात्सुराणां सुका रणे लाघवतश्च रामः।
विशेषणे द्वे य इहादिकर्तुर्वेदेदधीती स हि कैयटीये॥ १॥

सुपूर्वक धिवि धिन्व धातुः, विचि रूपम्। एवं सु पूर्वककृवि कृण्व धातुर्विचि लेपादौ रूपम् इति विषमीकाराः।

## तिसृणामिति—

ननु तिस्रादेशे "आदेशप्रत्यययोरि" त्यनेनादेशावयवत्वात्सकारस्य षत्वं कुतो नेति प्रश्नः?

नच सकारोच्चारणसामर्थ्यान्न षत्वमिति वाच्यम्। तिस्र आचष्टे तिसयति तिसयतीति तिः तिसौ तिस इति। षकारपाठे तु तिषौ तिष इति फलभेदस्य सत्त्वेन सामर्थ्यकल्पनाया उपक्षीणत्वात।

अथोत्तरम्—अन्तरङ्गपरिभाषया षत्वे कर्त्तव्ये तिस्रादेशस्य बहिरङ्गत्वेनासिद्धत्वात्षत्वाऽप्रवृत्तेः। अपरनिमित्तकत्वमन्तरङ्गत्वमिति व्याप्तेरिति सरयूपारीणशुक्लाः। "न रपरसृपिसृजि स्पृशिस्पृहि सवनादीनामि"ति षत्वनिषेधकशास्त्रीयसवनादिगणे तिसृशब्दस्य पाठेनापि षत्वाभाव इति केचित्।

## निषेधार्थकः "अ" शब्दोऽपि नास्तीति—

नच "अमानोना प्रतिषेधे" इत्युक्त्या निषेधार्थक "अ" शब्दोऽस्त्येवेति वाच्यम्? "न माङ्योग" इति सूत्रस्थभाष्यबलेन यथा निषेधार्थकमाशब्दो नास्ति। तथा "नञो नलोपस्तिङि क्षेप" इति वार्तिकबलेन निषेधार्थक "अ" शब्दोऽपि नास्तीति।

यदि निषेधार्थक "अ"शब्दश्चेत्तर्हि तेनैवाव्ययसंज्ञक "अ" शब्देन समासे रूपसिद्धौ नलोपविधानङ्किमर्थम्वार्त्तिककृता कृतं तस्मान्निषेधार्थकः "अ शब्दो मते केषामपि नास्तीति दिक्।

## उपेन्द्र इति--

इन्द्रमुपगत इत्युपेन्द्र इति तत्पुरुषसमासः । अव्ययीभावस्तु न? उपेन्द्रमिति क्लीबत्वविशिष्टरूपापत्तेः ।

इन्द्रादाधिक्येन वर्त्तते इत्युपेन्द्रः "उपोऽधिके चे"ति सौत्रादुपशब्दोऽधिकार्थकः । इन्द्रानुजत्वादिन्द्रादाधिक्येन वर्त्तत इति । "उपेन्द्र इन्द्रावरज" इति कोषः ।

अत्र सरयूपारीणशुक्लाः—उपगतःकोऽर्थः प्राप्त इन्द्रो यस्येति बहुव्रीहिरेवेति वदन्ति ।

## बहुश्रेयसी कुलमित्येवेति--

बह्व्यःश्रेयस्यो यस्मिन् कुले तद् बहुश्रेयसी कुलमित्येव रूपन्नतु बहुश्रेयसि कुलमिति ह्रस्वविशिष्टम् ।

नच "ह्रस्वो नपुंसके प्रातिपदिकस्ये"ति ह्रस्वविधायकप्रत्यक्षसूत्रस्य सत्वात्कथन्न ह्रस्वविशिष्टं रूपमिति वाच्यम् ? प्रत्यासत्तिन्यायमपहाय व्याप्तिन्यायानुरोधेन वाच्यसामान्यचिन्तापक्षमाश्रित्य "ह्रस्वो नपुंसक" इति "गोस्त्रियोरि"ति च ह्रस्वमात्रस्य "ईयसो बहुव्रीहेर्नेति वक्तव्यमि"ति वार्तिकेन निषेधात् ।

किञ्च "गोस्त्रियोरि"ति ईयसश्चे"ति सूत्रयोः "ईयसो बहुव्रीहौ पुम्वत् वचनमि"ति वार्त्तिकम् भाष्यस्थम्, तेन पुम्वत्वातिदेशाच्च ।

एवञ्च यथा ह्रस्वो न भवति तथैव शिशीनुमोऽपि न भवन्ति । तथाच पुंसीव क्लीबेऽपि द्वित्वबहुत्वयोः बहुश्रेयस्यौ बहुश्रेयस्य इत्येव रूपम् । नपुंसकत्वाभावेन "नपुंसकाच्चे"त्यादीनामप्रवृत्तेः । बहुश्रेयसि बहुश्रेयसिनी बहुश्रेयसीनीति वदन्तो भाष्यानवलोकिनस्सर्वथैव भ्रान्ताः ।

## नमस्स्वस्तिस्वाहेति--

नन्वेषु पदेषु सत्सु चतुर्थ्या विधानेऽपि आभ्युदयिके कर्मणि तुभ्यमृद्धिरिति, इदमन्नं मनुष्याय हन्त इत्येवम्विधे प्रयोगे कथं चतुर्थी, स्वस्त्यादियोगाभावात् इति प्रश्नः ? स्वाहास्वधाशब्दयोर्मनुष्योद्देश्यकत्यागार्थकहन्तादिशब्दानामप्युपलक्षणत्वमिति तद्योगे चतुर्थ्यास्सिद्धेः ।

## दुहयाचपचरुधप्रच्छीति--

ननु प्रच्छधातो "रिक्श्तिपौ धातुनिर्देश" इति इकि-सम्प्रसारणे पृच्छीति

युक्तन्नतु प्रच्छीति प्रश्नः ? "इक्श्तिपौ धातुनिर्देशे" इति सूत्रे इग् इति गित्व-निर्देशः चत्र्देन ककारश्रुतिरेवञ्च रुधिरितिसदृशप्रयोगे गित्वाद् गुणस्य"क्ङिति चे" ति निषेधः, कित्वाभावात्सम्प्रसारणं प्रच्छिवचीत्यादौ न भवति। अत एव "वचि स्वपियजादीनां किती"त्यादौ सम्प्रसारणन्न। गमि हनि जनि घसिषु "गमह-ने"त्युपधालोपोऽपि न, दृशि रञ्जि भञ्जिषु "अनिदितामि"ति नलोपाभावश्च। "इष गमी"त्यत्र सौत्रत्वाश्रयणञ्च नेति लाघवम्।

नच गित्पाठे इका निर्देश इति तत्र तत्र ग्रन्थासङ्गतिरिति वाच्यम्? इगा निर्देश इत्यस्यैव मूलभूतत्वेन विरोधाभावात्, गकारान्तकल्पनायास्स्वात-न्त्र्याच्च। नहि कस्य चिद् ग्रन्थकृतो विपरीतलिखनं युक्तिबलाद्वस्तुसिद्धौ बाधक-मिति व्युत्पत्तिवादाश्रयणात्।

"वचि स्वपी"ति निर्देशेनेकि न सम्प्रसारणमिति शेखरकाराः। प्रच्छीत्या-गन्तुनेकारेण निर्देशो नत्विका ? "ग्रहिज्ये"ति सम्प्रसारणप्रसङ्गादिति तत्त्वबो-धिनीकाराः।

परन्तु पूर्वोक्तगित्करणसमाधानस्यैव सयुक्तिकत्वमिति सरयूपारीणशुक्लाः।

## वृक्षाविति भवति न वेति—

वृक्षम्वृश्चतीति (१)वृक्षम्वातीति वृक्षम्वेतीति वा विग्रहे आचक्षाणणिचि "भोभगो" इति भाष्ये वृक्षव् करोतीत्यस्य साक्षात्कण्ठरवेणोपादानाद् वृक्षव् इति भवत्येवेति सूक्ष्मवेत्तारः।

नच "न पदान्ता हलोऽणस्सन्ति ननु चायमस्ति कर्तृ हर्तृ" इतिभाष्ये हल्रू-पाणो न सन्तीति व्याख्यानाद् वृक्षव् इत्येवम्विधानामनभिधानमेवेति वाच्यम्? प्रकृतिकार्यभाजः पदान्तकार्यभाजो वा हल्रूपाणो न सन्तीत्यर्थस्य कैयटे स्पष्टत्वात्।

नच वकारस्य कार्यभाक्त्वाभावे प्रकृतिकार्यभाक्त्वाभावे वा किम्प्रमाणमिति वाच्यम्? "भोभगो" इति सूत्रादशीत्यनुवृत्त्या अश्रूपहलि परे "हलि सर्वेषा-मि"त्यस्य प्रवृत्तिविधानेन वृक्षव् करोतीत्यादौ अश्रूपहलोऽभावाल्लोपाऽप्रवृत्त्या वकारस्य कार्यभाक्त्वाभावात्।

---

(१) वृक्षं वृश्चति इति क्विपि आख्यानण्यन्ताद् विजन्तं वृक्षविति तु न कै-यटोक्तव्युत्पत्तिः? उपधावृद्धेर्दुर्वारत्वात्। किन्तु वृक्षं वेतीत्यादिकमेवेति साधनप्रकारः।

किञ्च दोषसम्पादकाः पदान्ता हल्रूपाणो न सन्तीति व्याख्यानम् । तेन विष्णव् इह हरय् इहेत्यादौ पदान्तहल्रूपाणां सत्त्वेऽपि दोषाभाव इत्यभिधानाच्च ।

न च "हलि सर्वेषामि"त्यत्र "व्योर्लघुप्रयत्नतर" इति सूत्रात् फलाभावेन वकारानुवृत्तिरेव नास्तीति नैत्रोक्तव्याख्यानसङ्गतिरितिवाच्यम् ? "ईदूदेद्द्विवचनं प्रगृह्यमि"त्यत्र द्वन्द्वनिर्दिष्टैकारस्य निवृत्त्यर्थम् "अदसो मादि"ति ओयमादूप्रहणवत् द्वन्द्वनिर्दिष्टयोर्व्योरेकदेशनिवृत्तौ मानाभावाद् वकारानुवृत्तेस्सौष्ठवात् । तस्माद् वृक्षविति साध्वेवेति दिक् ।

## अधि हरीति—

अत्र हरौ इत्येव विग्रहवाक्यम्, इतिशब्दस्तु समानार्थत्वप्रतिपादक उत्तरान्वयी यावद् ब्रूयाद्धराविति तावदधिहरीति ब्रूयात् । इतिशब्देन विग्रहस्तु न भवति ? अव्ययीभावस्य नित्यत्वेनेतिनाऽव्ययेन समासापत्तेः । निपातेनेतिनाऽधिकरणाभिधानाद्धरिशब्दात्सप्तम्यनापत्तेश्चेत्यलम् ।

## मुखेन त्रिलोचनः करेण षडङ्गुलिः—

नन्वेवम्बिधेषु कथन्तृतीया "येनाङ्गविकार" इत्यस्याङ्गविकारे एव प्रवृत्तिविधानादेषु नाधिक्ये विकारत्वमिति नैव तृतीयाप्रसक्तिरिति प्रश्नः ? नियमाद् व्यवहाराच्च आधिक्ये आधिक्यस्यापि विकारश्रुतेरङ्गविकारत्वात् तृतीया निर्बाधैवेति समाधानम् ।

## इन्द्रौ—

इति प्रयोगो न भवति । इन्द्रश्चेन्द्राणी चेति विग्रहे इन्द्रेन्द्राण्यौ इति द्वन्द्व एव नत्वेकशेषः "वृद्धो यूने"त्यत एवकारानुवृत्त्या स्त्रीपुंसकृतविशेषे सत्येव तत्प्रवृत्तेः । अत्रास्ति पुंयोगकृतोऽपि विशेष इति ।

## वेल्लमानः—

ननु वेल्ल् धातोःपरस्मैपदित्वेन शानचो दौर्लभ्याद् वेल्लमान इति कथम्प्रयोग इति प्रश्नः ? "ताच्छील्यवयोवचनशक्तिषु चानशि"ति चानशा तादृशप्रयोगसिद्धेः ।

## अन्नम्—

ननु अन्नशब्दे अद् धातोःक्तप्रत्यये "अदो जग्धिर्ल्यप्ति किती"ति जग्ध्या-

देशः कुतो नेति प्रश्नः? "चक्षिङः ख्याञि"ति शास्त्रे भाष्ये "बहुलन्तणीति वक्तव्यम्" किमिदन्तणीति संज्ञाछन्दसोर्ग्रहणं कर्तव्यम् किम्प्रयोजनम् अन्नवधकगात्रविचक्षणाजिराद्यर्थम् तेन अन्नमित्यत्र जग्ध्यभावः, बधकमिति ण्वुलि वधादेशः, गात्रमित्यत्रौणादिके ष्ट्रनि इणो गादेशः, विचक्षण इत्यत्र ख्याञभावः, अजिरमित्यत्र "अजेर्व्यघञपोरि"ति वीभावाभावश्च सिद्धयन्ति । संज्ञायामन्नमिति (१)असंज्ञायां जग्ध ओदन इति भवति । बहुलग्रहणादेव पुंख्यानमित्यत्र "असनयोश्चे"तिवार्त्तिकेन ख्याञादेशस्य प्रतिषेधोऽपि नेत्यलम् ।

## विश्रम इति—

श्रम धातोर्घञि कृते श्रमेरुदात्तोपदेशत्वात् "नोदात्तोपदेशस्य मान्तस्यानाचमेरि"ति वृद्धिनिषेधात् विश्रम इत्येव रूपन्नतु विश्राम इति ।

अत एव कौमुद्यां कृदन्तप्रकरणे विश्राम इति त्वपाणिनीयमित्युक्तं संङ्गच्छते।

अत्र सरयूपारीणशुक्लाः—श्रम एव श्रामःस्वार्थिकः प्रज्ञाद्यण् "तद्धितेष्वचामि"तिवृद्धिः । विशिष्टः श्रामः विशब्देन साकं समासे विश्राम इति ।

किञ्च ण्यन्ताण्णिचि "निवृत्तप्रेषणद्धातोःप्राकृतेऽर्थे णिजुच्यते" इतिण्यन्तप्रकरणीयाभिहितरीत्या प्रयोजकव्यापाररहितत्वात्तदनन्तरं घञि दोषाभावः ।

किञ्च चान्द्रव्याकरणे "विश्रामो वा"इति वैकल्पिकवृद्धिविधायकसूत्रमिति तस्मात्सिद्धिः ।

किञ्च विश्रमणम्विश्रमः विश्रम एव विश्राम इति प्रकारान्तरम् । अत्रोत्तरपदस्यैवानुशतिकादित्वं प्रकल्प्य वृद्धिरिति वदन्ति । अत एव न्यायमुक्तावल्यां (१)अतःक्वचिद् विश्रामो वाच्य इतिलिखितमस्ति तत् साध्यमिति दिक् ।

---

(१) अत्रेदं विचार्यम्- अद्यते यत्तदन्नमिति व्युत्पत्त्या गोधूमतण्डुलादिपदार्थानामेव कुतो ग्रहणन्नतु आम्रादीनाम्फलानां रसजलप्रभृतीनाञ्चेति। अयम्भावः भक्ष्य-(खाद्य) लेह्यपेष्यचोष्यपेयादिकोटिविभागस्य प्रसिद्धत्वात् तेषाम्पेयचोष्यादिपदार्थानाम् न सामान्यव्युत्पत्तिकान्नशब्देन ग्रहणमपि तु प्रायशः खाद्यानामेव । अन्नशब्दस्याव्युत्पन्नप्रातिपदिकत्वेन वा संज्ञायां रूढत्वाद् यवतण्डुलादिबोधकत्वादतिप्रसङ्गाभावात् ।

(१) तत्र हि परमाणुसिद्धये प्रयतमानेन विश्वनाथभट्टाचार्येण अवयविन-

## अशोच्यानिति—

अशोच्यानन्वशोचस्त्वम्प्रज्ञावादांश्च भाषसे ।

अत्र गीतायामशोच्यान् इत्यस्य कथं सिद्धिरिति प्रश्नः ?

ननु शुच शोक इति धातुः तस्माण् ण्यत्प्रत्यये "ऋहलोर्ण्यदि"ति शास्त्रेण "चजोःकुघिण्यतोरि"ति कुत्वे शोक्यमिति सिद्ध्यति नतु शोच्यमिति । "अचो यदि"त्यस्य तु अजन्तत्वाभावान्न प्राप्तिः ।

शोचितुमर्हा इति विग्रहे यति शोच्या अशोच्या इत्यपि न भवति? शोचितुमर्हा इति विग्रहे "अर्हे कृत्यतृचश्चे"ति ण्यत्प्रवृत्तेर्दुर्वारत्वेन कुत्वापत्तिर्दोषत्वात्।

अथोत्तरम्—"आवश्यकाधमर्ण्ययोर्णिनिः कृत्याश्चे"त्यादौ आवश्यकशब्दस्य अर्थविशेषद्योतकत्वमात्रार्थकत्वेन क्वचित् अर्थप्रकरणादिगम्येऽपि तत्र ण्यत्कुत्वाभावौ भवत इति कल्पनात् ।

किञ्च "चजोःकुरि"ति सूत्रे "निष्ठायामनिट" इतिपूरयित्वा "न क्वादेरि"ति सूत्रप्रत्याख्यानपरवार्त्तिकमते(१)तु शुच्धातोर्निष्ठायां सेट्त्वात् तत्र कुत्वविधाय-

---

स्संसाध्य "तेषां चावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः, अतः क्वचिद् विश्रामो वाच्यः, यत्र तु विश्रामस्तस्यानित्यत्वेअसमवेतभावकार्योत्पत्तिप्रसङ्गात्" इत्यादिकं स्पष्टमेवोक्तम् ।

( १ ) प्रत्याख्यानप्रकारस्तु—

तथाहि गर्ज शब्दे इति भौवादिकात् "ऋहलोर्ण्यत्" इति ण्यत्प्रत्यये "चजोः कुः" इति कुत्वे प्राप्ते "नक्वादेः", इति तन्निषेधे गर्ज्यमिति सिद्ध्यति ।

नन्वेवं प्रच्छादिधातुभ्योऽपि ण्यति अभीष्टमपि कुत्वमेतत्सूत्रेण निषिध्येत । अर्जितर्ज्यादिधातूनामनिष्टमपि कुत्वं विधीयेतेति चेन्न। तादृशमेव अव्याप्त्यतिव्याप्तिदोषमभिलक्ष्य वार्त्तिककृता 'चजोः कुघिण्यतोर्निष्ठायामनिटः" इत्यादि न्यस्य ये धातवो निष्ठाप्रत्यये "यस्य विभाषा" इत्यादिसूत्रनिषेधादिटन्न लभन्ते तेषामेव चजोर्ण्यत्प्रत्यये कुत्वम् । ये च निष्ठाप्रत्यये इटमाप्नुवन्ति ( सेट्काः ) तेषान्न कुत्वमिति व्याख्याय अतिव्याप्तिरव्याप्तिश्च वारिता ।

तथाहि अर्जितर्ज्यादिधातुभ्यो निष्ठाप्रत्यये इण्निषेधकाभावेन तेषां सेट्त्वात् तेभ्यो ण्यति कुत्वविधायकस्य प्राप्तिरेव नास्ति । प्रच्छादि

कस्यं प्राप्तिरेव नास्तीति अशोच्यान् इत्यस्य सिद्धिरित्यलम् ।

## अल्पम्पच इति—

ननु "मितनखेचे" त्यस्य प्राप्त्यभावात्कथं खश् मुम् चेति प्रश्नः। चकारोऽत्र सूत्रे ऽनुक्तसमुच्चयार्थक इति लक्ष्यसिद्धेः । मितशब्दस्य मितार्थकरत्वेनादोषाच।

## वृषस्यन्ती कामुकी स्त्री—

ननु मनुष्यायां कथम्वृषस्यन्तीति प्रयोगः वृषमिच्छतीति विग्रहे मनुष्येऽर्थासंघटनादिति प्रश्नः। विश्वकोशप्रमाणेन "वृषः शुक्रलः पुमान्" तमिच्छतीति विग्रहेऽसङ्गत्यभावात् । वृषलीशब्दव्याख्यायां वृषं धर्मं लाति गृह्णातीति धर्मशास्त्रे वृषपदेन धर्मोऽपि धर्तुं शक्यते इति। अमरकोशेऽपि "वृषस्यन्ती तु कामुकी" इति लिखितम् ।

## उक्षाम्प्रचक्रुः, समूलघातं न्यवधीत्—

"कृञ्चानुप्रयुज्यते" इति सूत्रेऽनुग्रहणं व्यवहितविपर्यासयोर्निरासार्थमिति प्रथमे प्रशब्दव्यवधानं द्वितीये णमुलन्ते निशब्दव्यवधानम् ।

अथोत्तरम्—प्रमादात्तथोक्तेः । किञ्च उक्षान् प्रचक्रुर्नगरस्य मार्गानिति भट्टिकाव्ये आमन्तो न किन्तु उक्षानिति द्वितीयान्तं पदम् । उक्षान् सिक्तान् मार्गान् प्रचक्रुरित्याशयः । णमन्ते समूलघातमित्यत्र व्यवहिताव्यवहितयोर्नियमो नास्ति पाणिघातं वेदिं हन्तीति काशिकाप्रयोगात् ।

## महिषेऽसुराणामधिपे इति—

ननु दुर्गापाठे "महिषेऽसुराणामधिपे" इति नवाक्षरत्वेन अनुष्टुप्पादत्वं कथमेवं "यियक्षमाणेनाहूतः पार्थेनाथ द्विषन् मुरम्" इत्यत्र "पञ्चमं लघु सर्वत्रे"ति

---

प्रत्यये "यस्य विभाषा"- इति इटो निषेधेन सेट्त्वेनेति तेषां कुत्वं क्त्वादित्वेऽपि भवत्येव । "यस्य विभाषा" इति सूत्रप्रवृत्तिस्तु क्त्वाप्रत्यये 'उदितो वा' इतीड्विकल्पविधानसाहाय्येनेति ध्येयञ्च ।

एवञ्च "न क्त्वादेः" इति सूत्रन्न विधेयम् । नच सूत्रकारमताद् वार्तिककारमतमिदम्प्रविरुद्धमिति नाङ्गीकार्यमिति वाच्यम् ? "धिन्विकृण्व्योर च" इति सूत्रज्ञापितयथोत्तरम्मुनीनाम्प्रामाण्यमित्याश्रयणात् तन्मतस्य ( वार्तिककृतः ) अवश्यमादरणीयत्वादिति संक्षेपः ।

नियमेन पञ्चमस्य गुरुत्वं कथमिति प्रश्नः ? महिषेऽसुराणामीशे इति पाठस्यैव ज्यायस्त्वात्। पञ्चमस्य वर्णस्य गुरुत्वे विपुला नाम च्छन्दसःइत्यविरोधात्। विपुलायां चतुर्थवर्णो गुरुरिति छान्दसाः परन्तु "इत्यमरसिंहकृतौ नामलिङ्गानुशासने" इत्यत्र न चतुर्थो गुरुः। किराते ११ सर्गे "वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान्" इति यथा।

यत्र च अक्षरन्यूनता तत्र तु तद्वैदिकं निचृत् छन्दो मृत्युञ्जयतुर्यथेति प्रमाणप्रबन्धः।

## क्त्वाप्रत्यये विचारः—

"श्री शैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते" इति "शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च" सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे" कुमारसम्भवप्रयोगेषु कथं क्त्वाप्रत्ययस्समानकर्तृकत्वाभावात् इति प्रश्नः ? स्थितस्येत्यध्याहृतक्रियया समानकर्तृकत्वसम्भवात्। एवमन्यत्रापि। "अवजानासि मांयस्मादतस्ते न भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप से" तिवाक्ये मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यतीत्यर्थाद् विभिन्नकर्तृकादपि क्त्वा भवति। क्त्वान्तजन्यशाब्दबोधे समानकर्तृकत्वं नेति वाच्यम्। अनाराध्य स्थितस्येति स्थितिक्रियाध्याहारेण समानकर्तृकत्वमिति व्याख्यानात्।

## नमस्तस्यै नमस्तस्यै—

प्रहर्षहर्षशोकेषु (१)तथादैन्यभयेषु च।
स्तुत्यभ्यासानुवादेषु पौनरुक्त्यन्न दुष्यति॥

इति शिष्टोक्त्या युक्तिबलसिद्धया पौनरुक्त्यदोषाभावात् सिद्धत्वं बोध्यम्।

## गिरिश इति—

"गिरिशमुपचचार प्रत्यहं सा सुकेशी"इत्यादीनां कथं सिद्धिरितिप्रश्नः ? 'गिरौ डश्छन्दसी"ति वार्त्तिकस्य छन्दस्येव प्रवृत्तेर्यद्यपि न सिध्यति तथापि गिरि-

---

(१) केचिदत्र "स्वप्नदैन्यभयेषु च" इति पठितुमुत्सहन्ते। परन्तत्र स्वप्नशब्दस्य पाठो नादरणीय एव। स्वप्नस्थपदार्थानामप्रामाण्याग्राहकत्वादप्रमात्वाद् तत्रत्यभावनाया विकाररूपत्वाच्च पौनरुक्त्यादिदोषविचारे गुणविचारे वा सतामप्रवृत्तेः। दृष्टस्स्वप्नस्सत्फलो दुष्टफलको वेति विचारमधिरोहतां केषांचित् स्वप्नादीनां शैष्ट्येऽपि तस्य ( स्वप्नस्थशब्दादेः ) जागतौ प्रत्यक्षाभावाद् विचारानर्हत्वादिति।

रस्यास्तीति विग्रहे गिरिशब्दात् "लोमादिपामादिपिच्छादिभ्यश्शनेलच"इत्यनेन तद्धितीयशप्रत्ययेऽर्थाऽसङ्गत्यभावेन गिरिशमुपचचारेत्येवम्विधानां सिद्धिः ।

## ओदनः पक्त्वा भुज्यत इति—

प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत्प्रकाशत इति स्वादुमि णमुलिति भाष्यात् ।

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यथा गुणे तथा तद्वदनुक्त्वापि प्रतीयते ॥

इतिकारिकानुरोधेन प्रधानीभूतभुजिक्रियया कर्मण ओदनस्याभिहितत्वात्प्रथमा, ओदनः पक्त्वा भुज्यत इति ।

अतएव घटः कर्तुं शक्यत इत्यत्रापि तुमुन्नन्तनिरूपितस्यापि घटकर्मणः प्र धानशकधातुर्क्रिययाभिहितत्वेन प्रथमैव नतु द्वितीया ।

अत एव भाष्ये "क्षुत् प्रतिहन्तुं शक्यत"इत्युक्तम् । **अत्र दर्पणकाराः** यदा ओदने पाकक्रियानिरूपितकर्मत्वमेव शाब्दविषयत्वमभिप्रेतं स्यान्नतु प्रधानक्रियानिरूपितकर्मत्वस्यापि तदा ओदनम्पक्त्वा भुज्यतइत्येव द्वितीयान्तप्रयोगस्साधुः' ओदनस्यभोजनकर्मताया आर्थिकत्वात् ।

यदा तूभयकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतं तदा ओदनपदाद् द्वितीया असाध्व्येवोक्तव्यवस्थितेरिति ।

**प्रसङ्गात्किञ्चिद् बिलक्षणम्**—महाभाष्ये "शक्यञ्चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुमि"तिलेखः ।

ननु क्षुधशब्दस्य स्त्रीत्वात् शक्यमित्यस्य क्लीबत्वात्कथं शाब्दबोध इति प्रश्ने कैयटः-शकेः कर्मसामान्ये लिङ्गसर्वनामनपुंसकयुक्ते कृत्यप्रत्ययः ।

अस्यायम्भावः, पदान्तरसम्बन्धादुपजायमानमपि स्त्रीत्वं बहिरङ्गसंस्कारन्न बाधत इति शक्यं क्षुदिति ।

यदि तु पूर्वमेव विशेषविवक्षा तदा शक्या क्षुदिति भवत्येव ।

यदा तु प्रतिघातस्यैव क्षुत्कर्म शकेस्तु प्रतिघातस्तदा क्षुधं प्रतिहन्तुं शक्यमिति भवति ।

श्री नागेशभट्टस्तु क्षुधं प्रतिहन्तुं शक्यमिति प्रयोगो न मन्यते। "प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत्प्रकाशत" इति "स्वादुमि णमि"ति सूत्रभाष्यात्। कारकप्रकरणे शब्दरत्ने उद्योते च।

अत्रसरयूपारीणशुक्लाः--स्वसमभिव्याहृततुमुनन्तार्थकर्मणैव शक्धातोस्सकर्मकत्वन्नान्यथा स्वतस्सकर्मकत्वम्। अत एव कर्मप्रत्यये घटऽकर्त्तुं शक्यत इति कदाचिदपि भवति।

नच भट्टिकाव्ये "शक्यान्यदोषाणि महाफलानी"ति नेदं मम शक्यमिति वाक्ये च कथं कर्मसत्ता, तत्र तुमुनन्ताभावादिति वाच्यम्? कर्त्तुमिति तुमुनन्तक्रियाध्याहाराद एवम्विधे निर्वाहसम्भवात् इति वदन्ति।

## ईयिवांसमिति—

ननु उपेयिवाननाश्वाननूचानश्चेतिसूत्रेण उपेयिवानिति सिद्धेरेवोक्ततयेदंकथमिति प्रश्नः? उपेत्यस्याविवक्षया कविवाक्यसंरक्षणात् तथाच। भारविः—

पडिगताविति धातुः पण्डो गमनकर्त्ता। पण्डनं पण्डा "गुरोश्च हल" इत्यप्रत्ययः। सदसद्विवेकशालिनी बुद्धिऽपण्डा सा सञ्जाता अस्येति पण्डितः "तदस्य सञ्जातं तारकादिभ्यः इतजि"तीतच्प्रत्ययः।

## पण्डित इति--

यस्य सर्वे समारम्भाऽकामसङ्कल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणन्तमाहुऽपण्डितम्बुधाः॥

किञ्च पडि पशि नाशन इति चौरादिकः। यश्च सनातनधर्ममार्गात्परिभ्रष्टऽकेवलपण्डितनामधारी तीर्थपुरोहितः पण्डा पाण्डेयो वा लोकप्रसिद्धः स धार्मिकश्चेत्तर्हि पडिगताविति धातुना सिद्धिः। नास्तिकश्चेत्तर्हि पडि नाशने इति धातुना सिद्धिः। तत्र चौरादिकपडिधातोऽपण्डाशब्दसिद्धिस्तस्मादितचि पण्डित इति सरयूपारीणशुक्लाः।

## बाणैरसिभिर्ऋष्टिभिरिति दुर्गापाठः--

अयम्विचारः "दृष्ट्वा स्वरमधो याति हसं दृष्ट्वा तु चोर्ध्वताम्। अवसाने विसर्गस्स्याद् त्रिधा रेफस्य वै गतिरि"ति न्यायेन ऋषिशब्दावयवऋकारस्वरं दृष्ट्वा असिभिरिति भिसो रेफस्याधस्स्थितिरेव, अधस्स्थितिश्च ऋकारापेक्षया रेफ-

स्योच्चारणानर्हत्वान्न सम्भवतीति कथं श्लोकात्मकमन्त्रोच्चारणमिति(१)प्रश्नः ।

लौकिकप्रयोगव्यवहारविरुद्धमन्त्रोच्चारणं छान्दसत्वादुपायस्योपायान्तरादूषकत्वात् छान्दसत्वस्यागतिकगतित्वात् ।

## काव्यम्--

ननु कवेः कर्मेति काव्यम् अत्र कविशब्दात् "इगन्ताच्च लघुपूर्वादि"त्यनेनाणि कथं काव्यमिति चेन्न ? "गुणवचनब्राह्मणादिभ्यः कर्मणि चे"ति ब्राह्मणादिगणे कविशब्दस्य पाठात् ष्यञा अणो बाधात् काव्यमिति (२)सिद्धेः ।

ननु "प्रत्यग्रहीष्टां मधुपर्कमिश्रं तावासनादि क्षितिपालपुत्रावि"तिभट्टिकाव्ये क्षत्रियौ रामलक्ष्मणौतत्कर्तृकासनग्रहणे प्रतिपूर्वकग्रहधातोः कथं प्रयोगः इज्याध्ययनदानानि वैश्यस्य, क्षत्रियस्य च । प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथे"तियाज्ञवल्क्यवचनात् दाने एव प्रतिपूर्वकग्रहधातोः प्रयोगादिति चेन्न ? अयुक्त एवायम्प्रयोग इति समाधानात् ।

अत्र सरयूपारीणशुक्लाः रामलक्ष्मणयोर्ब्रह्मरूपत्वेन सर्वात्मकत्वात् इति विभावयन्ति ।

## क्रमशः--

आधुनिकैः क्रमश इति यत्र तत्र प्रयुज्यते परन्तु शस्प्रत्ययविधायकस्य "बह्वल्पार्थाच्छस्कारकादन्यतरस्यामि"त्यस्य प्राप्त्यभावात् क्रमत इति प्रयोज्यः ।

## सार्वजनीनः—

"सर्वजनाट्ठञ् खञ्चे"ति खप्रत्यये सर्वजनीन इत्येव ।

---

(१) अत्र शान्तनवीकाराः—असिभिऋष्टिभिरित्यत्र सलोपश्छान्दसत्वात् । यद्वा "रो रि" इति रेफलोपे "ढ्रलोपे पूर्वस्य" इति दीर्घाभावश्छान्दसः । अथवा असिभिरिष्टिभिः इत्येव पाठः । एवञ्च यष्टिभिरितिविवक्षिते सम्प्रसारणं छान्दसम् ।

असिभिरिति क्रियापेक्षं बहुत्वम् तथैव ऋष्टिभिरित्यपि । ऋष्टिरुभयतोधारोऽसिः, असिश्चैकधार एवेति केषांचिद् विशेषः ।

गुप्तवत्यान्तु—असिभिऋष्टिभिरत्र रेफलोपश्छान्दस इत्याहुः ।

इति दुर्गासप्तशत्या ८ अष्टमाध्यायस्य एकोनषष्टिश्लोके ।

(२) अत एव "वाक्यं रसात्मकं काव्यम्" लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्" इत्यादिकाव्यलक्षणद्वारा "तददोषौ शब्दार्थौ सगुणावनलंकृती क्वापि" इति दोषरहितयोः शब्दार्थयोः काव्यत्वमुक्तमिति काव्यप्रकाशोक्तिरनुसन्धीयते ।

नच स्थत्रार्थिकप्रज्ञादित्वादणि सार्वजननीनमिति वाच्यम् ? उपायस्योपायान्तरादूषकत्वात् अगतिकगतित्वात्स्वार्थिकाण इत्यभिधानाच्च ।

अत्र सुदर्शनः-सर्वो जनः सर्वजनः "पूर्वकालै कसर्वजरदि"तितत्पुरुषः । "तस्मै हितमि"तिविग्रहे सर्वजनीन इति । परन्तु सर्वजनाय साधु इति विग्रहे "प्रतिजनादिभ्यः खञि"ति खञि सार्वजनीनः वैश्वजनीन इति रूपमर्थविशेषे भवत्येवेति सरयूपारीणशुक्लाः ।

## पतञ्जलिरित्यत्र जश्त्वं कुतो न ?

अञ्जले‿पतितः पतञ्जलिः सन्ध्योपासनसमये कस्य चिदृषेरञ्ज ले‿पतितः । पतनन्तु मुनित्रयकल्पतरौ विस्पष्टम् । पतनानन्तरमृषिराह स्म कोऽभवानिति, सर्प उवाच सर्पोऽहम्, ऋषि‿पृष्टवान रेफ‿क्व गतः स आह भवन्मुखङ्गत इति। "मयूरव्यंसकादयश्चे"ति पञ्चमीतत्पुरुषे आकृतिगणत्वात् तस्मिन्नेव निपातनादितशब्दलोपे जश्त्वाभावे च शकन्ध्वादित्वकल्पनमन्तरेणापि पतञ्जलिस्सिद्ध्यति ।

न च "पृषोदरादीनि यथोपदिष्टमि"त्यनेनैव सिद्धिस्तकारस्य "झलाञ्जशोऽन्त" इत्यनेन जश्त्वाभावश्च शिष्टैस्तथोच्चरितत्वादिति वाच्यम् ? अगतिकगतिन्यायेन समाससिद्धये मयूरव्यंसकादित्वकल्पनस्यावश्यकत्वेन निपातेन लोपस्याऽपि तेनैव सिद्धेर्लाघवात् ।

नच जश्त्वन्तु दुर्वारमेवेति वाच्यम् ? पतितशब्दे इकारतकारयोर्लोपेऽकारस्य वार्तिकेन पररूपे तस्य "स्थानिवदादेश" इति स्थानिवद्भावादकारव्यवधानेन जश्त्वाऽप्रवृत्तेः । मयूरव्यंसकादित्वात्समासेऽकारान्ततशब्दस्य पररूपेऽर्द्धोधिक्यविकारेण पदत्वाऽभावाच्च ।

वस्तुतः--मयूरव्यंसकादित्वात्समासे तत्रैव निपातनात् पतितघटकेतशब्दस्याकारान्तस्य लोपे जश्त्वाऽभावनिपातने च रूपसिद्धिरिति ।

किञ्च मयूरव्यंसकादित्वात्समासे तितशब्दस्य मकारान्ततमित्यादेशे पतम् अञ्जलिरिति स्थिते शकन्ध्वादित्वादमित्समासे तितशब्दस्य मकारान्ततमित्यादेशे पतम् अञ्जलिरिति स्थिते शकन्ध्वादित्वादमित्यस्य पररूपे तस्य स्थानिवद्भावान्न जश्त्वमिति सरयूपारीणशुक्लाः ।

नच पतन् अञ्जलेरित्येव विग्रह‿कुतो नेति वाच्यम् ? लडर्थवर्तमानकालार्थाऽसङ्घटनात् कौमुद्युक्तशकन्ध्वादित्वकल्पे नु शकन्ध्वादिविषये तद्विरुद्धे

…ADVA… Acc. No 65.30 Date

नुगुणम्परसपम्वाक्यम् इत्यर्थादेव पररूपानन्तरञ्जश्त्वाभावः जश्त्वस्य तत्सिद्धेरननुगुणत्वात् पररूपानन्तरमेव तत्सम्भावना तादृशं पररूपम्वाच्यं येन जश्त्वाद्यनिष्टोपद्रवेण लक्ष्याऽसिद्धिस्स्यादिति ।

अत्र भाष्यसिद्धान्तः "टे"रितिवार्त्तिकम्भाष्यानुक्तम् । मनीषादिसिद्धिश्च पृषोदरादित्वात् । कैयटादिभिस्समर्थितमेतत् ।

## चतुष्पञ्चाशादित्येव रूपम् ।

संस्कर्तेति प्रयोगसाधुत्वे द्वितं चतुष्पञ्चाशत् । "द्वित्रिचतुर्भ्यस्सुजि"ति सुजन्तत्वे तु वैकल्पिकं षत्वम् । "अतः कृकमी"त्यत्र कंसग्रहणेन "कमेस्सः कंसः" इति भाष्योदाहरणेन च "उणादयोऽव्युत्पन्नानि प्रातिपदिकानी"त्यस्यैव सिद्धान्तितत्वेन अप्रत्ययत्वात् "इदुदुपधस्य चाऽप्रत्ययस्ये"तिनित्यषत्वविधानात् ।

तथाच चतुष्कपालः ["चतुष्पादो गर्भिण्ये"तिसूत्रे चतुष्पञ्चाशदित्येव नित्यषत्वविशिष्टरूपाणि कस्याञ्चित्कौमुद्यां चतुःपञ्चाशदित्येव लेखप्रमादो भासत इत्यलम् ।

## वर्षाभूरिति ।

अत्र वर्षासु भवतीति विग्रहः । वर्षाशब्दो नित्यबहुवचनान्तः ऋतुवाचकः । अत्र वर्षाभ्वी कमठी दुलिरिति तु स्त्रीत्वविवक्षायां गौरादिङीषन्तः । नच "वर्षाभ्वश्चे"ति सुपि प्रवर्त्तत इति यण् न स्यादिति वाच्यम् ? अजादितद्धिते "ओर्गुण" इत्यादिभिर्बाधाददोषेण अजादावङ्गाक्षिप्तप्रत्यये यण्विधानात् । स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्यमरः प्रमाणम् । नच "वाताय कपिला विद्युदातपायातिलोहिनी । पीता वर्षाय विज्ञेया निर्वर्षाय सिता भवेदि"ति श्लोके पुंस्त्वविशिष्टैकवचनान्त एव वृष्टिरूपार्थवाचकवर्षशब्दप्रयोगः कथमिति वाच्यम् ? प्रमाद एवायमिति सरयूपारीणशुक्लाः ।

अत एव पुंस्त्वविशिष्ट(१) वर्षशब्देन संवत्सरग्रहणं सार्वजनीनं सुगतम् वृष्टिरूपार्थस्तु नेति दिक् ।

---

(१) केचित्तु "वृष्टिर्वर्षन्तद्विघातेऽवग्रहावग्रहौ समौ" इति वर्षशब्दोऽदन्तोऽपि इति आदन्तवर्षाशब्दस्य "वर्षासु रथकारोऽग्नीनादधीत" इत्यादिप्रमाणैर्बहुवचनान्तत्वेऽपि अदन्ते तादृशावकाशाग्रहात् "पीता वर्षाय विज्ञेया" इत्यादौ वर्षशब्दस्यैकवचनान्तत्वे न विरोध इति वदन्ति ।

## पृच्छा जिज्ञासा च समानार्थकशब्द इति—

प्रच्छ ज्ञीप्सायामिति धातुः, जिज्ञासा च ज्ञातुमिच्छा, प्रच्छधात्वर्थज्ञीप्साऽपि ज्ञातुमिच्छैव । जिज्ञासाशब्दः ज्ञाअवबोधने सन्नन्तः, ज्ञीप्साशब्दः ज्ञप् ज्ञाने ज्ञापने च सन्नतः । "ज्ञप् मिच्चे"ति चुरादिगणसूत्रतत्त्वबोधिन्यां-"प्रतिपज्ज्ञप्तिचेतना" इति ।

प्रच्छ ज्ञीप्सायामित्यत्र यत्किञ्चित्कर्तृकप्रश्नाव्यवहितोत्तरकालिकज्ञानविषयिणीच्छेति, ज्ञीप्साशब्दार्थो विशेषज्ञानम्, ज्ञा अवबोधन इतिधात्वर्थस्तु सामान्यज्ञानमेव । तथा च पृच्छाजिज्ञासाशब्दार्थयोर्भेदस्स्पष्ट एवेति ।

प्रश्नशब्दस्य अज्ञातार्थविषयकज्ञानानुकूलव्यापारार्थकत्वेन यदि तद्विषयकं ज्ञानन्नास्तीति कथं प्रश्नः ? "ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः । व्यापारः कृतिजन्योहि तज्जन्यं फलमुच्यत" इति तद्विषयकज्ञानम्विनेच्छैव नोदेत्यतः किं समीह्यम् ।

## युष्मदाद्यादेशे विचारः—

नृसिंहाश्रम ते ख्यातिरिति श्रुतन्ते वचनन्तस्येति वेदानधीत इति नाधिगतम्पुरा मे इति प्रयोगाः कथम् ? प्रथमवाक्ये तु आमन्त्रिताविद्यमानवद्भावेन पदात्परत्वाभावेनादेशो न प्राप्नोति इति च प्रश्नः ? ते इति विभक्तिप्रतिरूपकमव्ययम्, द्वितीयवाक्ये त्वयेत्यर्थे ते इति विभक्तिप्रतिरूपकमव्ययम् ।

तृतीये तु मयेत्यर्थे मे इति विभक्तिप्रतिरूपकमव्ययम् । गेये केन विनीतौ वामिति रघुवंशे तु वामित्यपि युवामित्यर्थे विभक्तिप्रतिरूपकमव्ययम इति सिद्धान्तात् ।

## गोमानिति—

ननु "ज्योत्स्ना तमिस्रे"तिनिपातनाद् गोमीति मत्वर्थे कथं गोमानिति प्रश्नः ? केशाद्वोऽन्यतरस्यामि"तिसूत्रादन्यतरस्यामित्यनुवृत्त्या तस्य मतुप्समुच्चयार्थकत्वे रूपसिद्धेः ।

नच तदनुवृत्तौ किम्प्रमाणमिति वाच्यम् ? "एकगोपूर्वाट्ठञ् नित्यमि"तिसूत्रे नित्यग्रहणात्ततः प्राक् मतुप्समुच्चयार्थकान्यतरस्यामित्यनुवृत्तिसूचनात् ।

## हे सुभ्रु—

मुकुलयति च नेत्रे सर्वथा सुभ्रुखेद इति भवभूतिः । विमानना सुभ्रु पितुर्गृहे

कुत इति कालिदासः। छभ्रु किं सम्भ्रमेण, सहैकवंशप्रभवभ्रु वभ्रु इत्याद्यनेकप्रयोगाः।

## सखिना—

सखिना वानरेन्द्रेण लङ्का दग्धा महापुरी, सीताया पतये नम इत्यादौ छान्दसत्वेन "षष्ठीयुक्तश्छन्दसीति विसंज्ञा। पतिशब्दादाचक्षाणणिचि "अच इरि"-त्यौणादिकसूत्रेण इत्यये पतिरिति केचित्, तावतापि रूपसिद्धिः।

## अष्टवर्षा इति श्लोके विचारः—

अष्टवर्षा भवेद् गौरी नववर्षा च रोहिणी।
दशवर्षा भवेत्कन्या तत ऊर्ध्वं रजस्वला॥

अत्र नवीनानाम्विमर्शः—अत्राष्टनशब्दे एकशेषेण अष्ट इति अष्ट १६ षोडश इत्यर्थः। नव नव इति एकशेषेण नव १८ अर्थादष्टादशेति। दश दशेति दश अर्थाद्विंशतिः २०। विंशतिवर्षोत्तरकालेऽत्यन्तपौष्टयाद् रजस्वलात्वम्। पुत्रादयोऽपि पुष्टतरा भवन्ति। विवाहकालः षोडशवर्षारम्भात्मकः। विंशतिवर्षाभ्यन्तरं यावत् विवाहव्यवहारस्समापनीय इति पराशरमुनीनामभिप्राय इति वदन्ति।

अत्र शाब्दिकम्मन्याः नवसंख्याबोधतात्पर्येण चत्वारश्च पञ्च चेति न विग्रहे द्वन्द्वार्थम् षोडशसंख्याबोधतात्पर्येण अष्टाविति अष्टेति च स्थले नैकशेषः। "एकादिदशान्तसंख्यावाचिनामेकशेषद्वन्द्वावनभिधानान्न भवत" इति सरूपसूत्रभाष्यम्। एतेन एकादशेत्यत्र एकश्च दशचेति द्वन्द्वो न युक्त इत्यपास्तम्।

किञ्च यौगिकप्रयोगनिषेधकम्वाक्यम् सरूपसूत्रीयम्। एकादशादयश्च संख्याविशेषे लोकवेदयो रूढा इति नापत्तिः।

वस्तुतस्तु "त्यदादितश्शेषे पुन्नपुंसकयोर्लिङ्गवचनानी"तिभाष्ये तु एकादिनवान्तानामेकशेषद्वन्द्वावनभिधानान्न भवत इति नैकादशादावापत्त्याभा।

"एकद्विकरणे हेतु महापातकपञ्चके इति नैषधीय १७ सप्तदश सर्गे एकद्वीति प्रामादिकमेव। विंशत्यादौ त्विष्ट एवैकशेष इत्यलम्।

## अत्रैव केचित्—

माघे धनवती कन्या फाल्गुने सुभगा भवेत्।
वैशाखे च तथा ज्येष्ठे पत्युरत्यन्तवल्लभा॥ इति

यस्याःकन्यायाःपितुर्गृहेऽधिकं धनं सा धनवती कन्या माघेऽत्यन्तशीतकाले-

चत्र भोजनवस्त्राणामाधिक्येन सञ्चय~कर्तव्यो भवति। दरिद्रा कन्या तु माघे नैव विवाह्या। या कन्या सुभगा प्रौढ़ा सव फाल्गुने विवाह्या। प्रौढ़ाविवाहो वसन्तकालव्यवस्थासम्पन्नः।

अथवा भगमैश्वर्यं सुष्टु भगं यस्यास्सा सुभगा अत्यन्तधनवती राजादि-कुलोत्पन्ना फाल्गुने विवाह्येति।

वैशाखे ज्यैष्ठे तु पत्युः अत्यन्तवल्लभा या कन्या सा विवाह्या "वसन्त-श्चत्रवैशाखौ" इत्युक्त्या वैशाखस्यापि वसन्ताङ्गत्वम्। पुरुषस्याग्निसमत्वम्, स्त्रियश्च जलसमत्वम्। तयोर्विवाहसंयोगयोर्विलक्षणा शान्तिरशान्तस्य न सुखम् इत्थम्वदन्ति। अत्रेयंकुसृष्टिकल्पनेति सरयूपारीणशुक्लाः।

## तिरस्क्रियेतिषत्वविचारः—

ननु "तिरस्कृतस्तस्य जनाभिभाविने"ति माघश्लोके "अनादर~परिभव~परीभावस्तिरस्क्रिये" त्यादौ कथं सत्वम् तिरसो गतित्वाभावादिति प्रश्नः? अन्तर्द्धेरुपचारात् अनादृतोऽप्यन्तर्हितो भवति।

तथाच अनादरेऽपि "तिरोऽन्तर्द्धौ विभाषा कृञी"त्याभ्यां गतित्वम्।

शेखरकारास्तु—"तिरसोऽन्यतरस्यामि"ति सूत्रे पराभवे तिरस्कार-शब्दप्रयोगात् अन्तर्द्धावेव तिरसो गतित्वाद् 'गतिग्रहणन्नानुवर्त्तत इत्युक्तवन्त-स्तन्न? तिर~कृत्वा काष्ठं गत इति वक्रीकरणार्थेऽपि सत्वापत्तेरत~पूर्वप्रकार एव ज्यायानिति दिक्।

## बिम्बोष्ठ इति—

बिम्बसदृश ओष्ठ इति मध्यमपदलोपिसमासः ननु ओष्ठो बिम्बमिवेत्युप-मितसमासः? ओष्ठस्य पूर्वनिपातापत्तेः। बिम्बोष्ठस्ते सुधायत इति, एवम्बिम्बा-धर इत्यपि।

## न कर्मधारयान्मत्वर्थीयः—

न कर्मधारयान्मत्वर्थीयो (१) बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः। अतः नीलो-

---

(१) अत्र व्युत्पत्तौ कर्मधारयपदं बहुव्रीहीतरसमासपरम्। एवञ्च बहुव्रीहीतरसमासान्मत्वर्थीयो न भवति इति तदर्थः।

अत एव गुणप्रकाशरहस्ये दीधितिकृता नैयायिकेन बहुव्रीहिसमासेन मत्वर्थी-

त्पलवती सरिदिति वाक्यन्न भवति । "प्रत्ययस्थादि"ति सूत्रभाष्ये "अशुम्भत" इति प्रयोगदर्शनेन क्वचित्कर्मधारयादपि मत्वर्थीयः ।

अत एव किरातार्जुनीयः सर्गे "परिणामसुखे गरीयसि व्यथकेऽस्मिन् वचसि क्षतौजसाम् । अतिवीर्यवती"ति पदं सुगतम् । धान्यार्थी विद्यार्थीत्यादौ "अर्थाच्चासन्निहिते" तदन्ताच्चे"तीनिः ।

किञ्च धान्यमर्थयते तच्छीलो धान्यार्थी "सुप्यजातावि"ति णिनिरेव ।

## परममहत्परिमाणम्--

अत्र "आन्महत" इत्यात्वन्तु न भवति ? षष्ठीतत्पुरुषसमासाभिधानात् ।

---

यार्थलाभे अगुणवत्त्वमिति पदे गुणस्याभावोऽगुणन्तदस्यास्तीत्यगुणवान् इति विग्रहं निराकुर्वाणेन न गुणवानगुणवानिति विग्रहम्प्रदर्शयता च स्पष्टीकृतम् ।

नच बहुव्रीहेरन्यपदार्थप्रधानतया तदुत्तरमत्वर्थीयार्थस्य तावत्पदबहुव्रीहिणा बोधयितुमशक्यत्वात्, कृदन्ततद्धितान्तादिपदोत्तरमत्वर्थीयार्थस्य तादृशपदबहुव्रीहिसमासस्यैवासम्भवेन बोधयितुमशक्यत्वाच्च बहुव्रीहीतरत्वं समासत्वञ्च व्यर्थमिहेति वाच्यम् ? उद्देश्यांशे उपरञ्जकस्यापि विशेषणत्वेन स्वरूपबोधनार्थत्वात् । नच "नकर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तत्र सम्भवति" इत्येव स्वरूपमस्तु इति वाच्यम् ? राज्ञः पुरुषो राजपुरुषः राजपुरुषवानित्यत्र राजा पुरुषो यत्रेति बहुव्रीहेस्सम्भवात् । नचैवमपि यत्र राजा राजसम्बन्धी पुरुषश्चास्ति तत्र मतुब्बोध्यस्य देशविशेषस्य बहुव्रीहेः प्रतिपत्तिसम्भवेनानुपपत्तितादवस्थमिति वाच्यम् ? यत्पदेन यादृशधर्मावच्छिन्नविषयताको बोधो मत्वर्थीयसमभिव्याहृतेन जायते, मतुपस्समभिव्याहारं विना तेन पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयो न भवतीत्यर्थस्यैव तत्राभिप्रेतत्वात् ।

तथाच राजसम्बन्धिपुरुषसम्बन्धित्वावच्छिन्नविषयताको बोधो मतुप्समभिव्याहृतेन राजपुरुषपदेन जायते । बहुव्रीहिसमासेन तु राजाभिन्नपुरुषसम्बन्धित्वेनैवेति दोषाभावात् ।

एवञ्च आरूढवानरवान् जरच्चित्रगुमान् इति च आरुढवानरसम्बन्धित्वेन जरदभिन्नचित्रगोसम्बन्धिपुरुषसम्बन्धित्वेन बोधतात्पर्येण साधुरेव । बहुव्रीहिणा स्वकर्मकारोहणकर्तृवानरसम्बन्धिसम्बन्धित्वेन जरदभिन्नचित्रगोसम्बन्धिनस्सम्बन्धित्वेन च मत्वर्थीयार्थस्याप्रत्ययादिति । इयञ्च व्युत्पत्तिर्लाघवमूलिकेति न विस्मर्त्तव्यम् ।

तथाच (१)मुक्तावल्यां नैयायिकोक्ति स्सुगतेति ।

## त्वत्तः मत्त इत्यादि–

ननु त्वत्तः मत्तः भवत्त इति कथं "पञ्चम्यास्तसिलि"ति "किं सर्वनामबहुभ्योऽद्व्यादिभ्य" इति सूत्राधिकारादिति चेन्न ? "अपादाने चाहीयरुहो रि"त्यनेनैषां सिद्धेरिति दिक् ।

## सहस्रमूर्तये इति––

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुवाहवे ।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

अत्र सहस्रशीर्षापुरुष इतिवत् सहस्रशब्दो बहुत्वार्थकः । अनेकमूर्त्तय इत्यर्थः। एवमन्यत्रापि । शिरोरुवाहव इत्यत्र गुणस्तु छान्दसः । किञ्च "पृषोदरादि"त्वाद्वा शिरोरुवाहव इत्यस्य सिद्धिः ।

## दाशरथायेति––

ननु दशरथस्यापत्यं दाशरथिरित्येव नतु दाशरथ इति कथं प्रदीयतां दाशरथाय मैथिलीति रामायणप्रयोग इति प्रश्नः? अत्र शेखरकारेण तु दाशरथायेत्यस्याऽसाधुत्वमेव कथितम् । अत्र सरयूपारीणशुक्लाः दाशरथिरेव दाशरथः स्वार्थिकः "प्रज्ञादिभ्योऽणि"त्यण्, अदन्तः इति साधुत्वमवदन्ति ।

## वैद्यानां शारदी माता—

ननु शरच्छब्दो हलन्त कथं शारदीति प्रश्नः? यदि शरत्काले तात्पर्य्यन्तर्हि तस्मात्स्वार्थिकः प्रज्ञाद्यण् अणन्तान्ङीप् ।

किञ्च सरस्वतीवाचकशारदाशब्दात्स्वार्थिकेऽणि अणन्तान्ङीपि शारदीत्यपि ।

## सम्पूजयित्वा पितरम्––

आर्षत्वान्न ल्यप् इति केचित । चौरादेराकृतिगणत्वात्सम्पुजीति धातुश्चौरादिकः तत्र नोपसर्गं इति न समासल्यपौ ।

किञ्च पितरं पूजयित्वा सं सम्यक्तरत्नेन जगाम । समित्यस्य पृथगन्वयः न समासः ।

---

(१) परममहदिति परिमाणविशेषणम् पृथगेव बोधकत्वतु समस्तमिति नात्रात्वप्रसक्तिरिति केचित् ।

किञ्च दन्त्यसकारो न किन्तु शम्पूजयित्वेति पाठः । पितरं पूजयित्वा शं सुखेन जगामेति पृथगन्वयः ।

## एकत्रितः--

एकन्तरतीत्येकता, तृ प्लवनतरणयोः स सञ्जात इति विग्रहे "तदस्य सञ्जातमि"ति इतच् । एकं त्रायते त्रैङ् पालने इतच् । अथवा त्रितशब्दः एकश्चासौ त्रित इति एक त्रितः 'एकत्रितशब्दोऽव्युत्पन्नः रूढः ।

## भाति पद्मस्सरोवरे--

अत्र लेखकप्रमाद एव । भाति पद्मं सरोवरे इति क्लीबत्वविशिष्टपाठेन छन्दश्शास्त्रविरोध इति न "अर्श आदि"त्वकल्पनम् ।

## एषो यन्हसतीति--

इणश्शतृप्रत्यये यन्निति । अत्रैतत्तदोरिवि लोपे यणस्स्थानिवत्त्वाद्धल्त्वाभावान्न सुलोपः । इशिचेत्युत्वे तु न स्थानिवद्भावो "नपदान्त" सूत्रेण तन्निषेधात् ।

## एषो गमयति--

पूर्वोक्ता कथेहापि "इणो गमि"रिति प्रकरणे "णौ गमिरबोधन" इति सूत्रेण गम्यादेशे एषो गमयति "एतत्तदोरि"ति लोपे "अचः परस्मिन्नि"ति स्थानिवद्भाव इति न सुलोपः । इशिचेत्युत्वे तु "न पदान्त" सूत्रेण निषेधाद्धशत्वादुत्वम् इति भाष्यमतम् ।

## लिड्ढौकनामिति--

अत्र "ढोढे लोप" इति सूत्रस्थभाष्यम् "ढलोपेऽपदान्तग्रहणं कर्त्तव्यम्, इह माभूत लिड्ढौकते गुडलिड्ढौकते तत्तर्हि वक्तव्यम्न वक्तव्यम्, झलाञ्जशोऽन्त इति जश्त्वमत्र बाधकम्भविष्यति । अत्र कैयटः "पूर्वत्राऽसिद्धमि"ति सूत्रेण लोपस्याऽसिद्धत्वात्पूर्वञ्जश्त्वे लोपस्याऽप्राप्तिरेव बाध इति ।

तथाच ढलोपस्तत्प्रयुक्तदीर्घश्च नेति लिड्ढौकनमित्येव नतु लीढौकनमिति ढलोपदी र्वादिन × फक्किकारत्नमञ्जूषाकारा भ्रान्ताः ।

## राष्ट्रिय इति--

अत्र "राष्ट्रावारपाराद् घखावि"ति सूत्रेण घप्रत्यये "आयनेयी"तिइयादेशे राष्ट्रिय इति सिद्ध्यति ।

आधुनिकास्तु राष्ट्रीय इति लिखन्ति पठन्ति च । स प्रयोगश्च "गहादिभ्य-श्चे"ति छप्रत्यये कथञ्चित्सिद्धयत्याकृतिगणत्वाद् गहादेः ।

"तस्येदमि"त्यनेनापि राष्ट्राणामयं राष्ट्रीय इति छप्रत्ययः ।

यद्यपि "राष्ट्रावारे"ति सूत्रे राष्ट्रशब्द ॅप्रतिपदोक्तत्वस्यैव प्रवृत्तिः प्रबला, तथापि अर्थांशे किञ्चिद् वैलक्षण्यसत्वे सूत्रान्तरप्रवृत्तिरपि निष्प्रत्यूहैवेति ।

## सीतारामाय नम इति—

सीतारामाभ्यां नम इति तु युक्ततरमेव ।परन्तु "अभ्यर्हितञ्चे"त्यनेन रामस्या-भ्यर्हितत्वेन तस्यैव पूर्वनिपातो युक्त इति यद्यपि वक्तुं शक्यते तथापि "यस्या बलेन भुवनं सृजते विधाता यस्या बलेन भुवनं परिपाति चक्री । यस्या बलेन भुवनं हरते पिनाकी साऽद्या सदा दिशतु नो मनसेप्सितं यदि"त्यादिप्रमाणैः शक्तिम्बिना किमपि कार्यमतीव योग्यं सिद्धयत्ययं विमलमार्गततिप्रकारः।नचापि सिद्धयत्ययमेव मार्गः। शक्त्यैव सर्वम्विलक्षणं काव्यं रामादिवश्चकारेत्यादिप्रबन्धशक्तिरेव प्रधानेति तद-भिप्रायेण सीताशब्दस्याऽभ्यर्हितत्वेन तस्यैव पूर्वनिपातः । एवं राधाकृष्णपार्व-तीपतिदेवकीनन्दनादिशब्देऽपि समुत्तरम् ।

## सीतारामाय नम इत्यपि—

ननु सीता च रामश्चेति द्वन्द्वे सीतारामौ सीतारामाभ्यामिति द्वित्वविशिष्टं युक्तमिति कथमत्र सीतारामायेति एकवचनान्त इति प्रश्नः ?

सीताया आराम आनन्दो यस्मादसौ सीतारामस्तस्मै सीतारामायेत्येकः प्रकारः।

सीताया रामस्सीतारामो ननु बलरामादयस्तस्मै सीतारामायेति द्वितीय ॅ प्रकारः ।

सीतया सहितो रामस्सीताराम इति शाकपार्थिवादित्वात्सहितस्य मध्य-मपदस्य लोपः तत्पुरुषसमास इति तृतीय )( प्रकारः ।

सीतायामारामो यस्येति बहुव्रीहिः तस्मै सीतारामायेति चतुर्थप्रकारः ।

सीतां रमयतीति सीताराम इति तस्मै सीतारामायेति पञ्चम ॅ प्रकारः ।

आरामो वाटिका सीताया आरामो वाटिका आनन्दवाटिकेति यावत सीता-राम इति तस्मै सीतारामायेति षष्ठ ॅ प्रकारः ।

रमणं रामस्सीताया रमणं यस्माद् यस्मिन् वा सीतारामस्तस्मै सीतारा-मायेति सप्तम ॅ प्रकारः ।

सीतां रातीति सीतारस्तममयति प्रापयतीति सीतारामो विष्णुः तस्मै सीतारामायेति चाष्टम ऽ प्रकारः ।

रामम् आकोऽर्थो मर्यादीकृत्य सीता सीतारामस्तस्मै सीतारामायेति नवमः प्रकारः ।

सीता रमते यस्मिन्नसौ सीतारामस्तस्मै सीतारामायेति दशम ऽ प्रकारः इत्याद्यलमतिविस्तरेणेति—सरयूपारीणशुक्लाः ।

## निवास इति—

यत्र स्वयम्वसति स निवासः निपूर्वकवस् आच्छादने इति धातुः । अत एव "सोऽस्य निवास" इति पाणिनीयं सूत्रं सङ्गच्छते ।

## अभिजन इति—

यत्र पूर्वैरुषितं सोऽभिजन इति । अत एव "तत्र जात" इति पाणिनीयं सूत्रं सङ्गच्छते ।

आधुनिकास्तु—जन्मभूमिप्रश्नतात्पर्येणापि कुत्र ते निवास इति प्रश्नयन्ति ते तु भ्रान्ता एव पाणिनिसूत्रविरोधात् ।

## त्राहीति—

त्राहि मां शरणागतमिति सदृशवाक्ये त्राहीति कथं, त्रैङ् पालन इति धातोरात्मने पदित्वात् त्रायस्वेति वाक्यस्यैव युक्तत्वादिति । प्रश्नः ? त्रायत इति त्राः क्विबादि, त्रा इवाचर, त्राहि, त्राशब्दादाचारक्विबन्ता "त्सर्वप्रातिपदिकेभ्य ऽ क्विब्वा वक्तव्य" इति(१) नामधातो क्विपि त्राकर्तृकसदृशाचरणकर्त्तेति शाब्दबोधः ।

अत्र सरयूपारीणशुक्लाः—प्रयोगसिद्धावपि अर्थवैचित्र्यान्नायम्प्रकारः । शरणागतं मां त्राहि कोऽर्थो रक्षेति तात्पर्येण रक्षाकर्तृकसदृशाचरणकर्तेति बोधो

(१) एवमेव भयेभ्यस्त्राहि नो देवि इति एकादशाध्यायस्य त्रयोविंशतितमश्लोके त्रैङ् पालने इति धातोरात्मनेपदित्वेन त्राहीति परस्मैपदं कुत इति प्रश्ने समालोच्यताम् । तत्र हि छान्दसम्परस्मैपदमिति केचित् । त्रायते इति त्राः क्विबन्तम् । त्राइवाचर त्राहि रक्षक इवाचर इत्यर्थः । आचारे "सर्वप्रातिपदिकेभ्यः क्विप्" वा ।

त्राहि इति विभक्तिप्रतिरूपकमव्ययं वा ।

परे तु त्राहीत्यार्षमिति वदन्ति ।

नाभिप्रायविषयः । एवञ्च पृषोदरादित्वात् आयस्येत्यस्य स्थाने आहोत्यादेशे-नार्थादिसङ्गतिरिति वदन्ति ।

## तत्तत्कालीन इति—

कालशब्दात्तद्धितीय "कालाट्ठञि"ति ठञि "ठस्येक" इतीकादेशे कालिक इति सिद्ध्यति । किञ्च कालशब्दात्खप्रत्यय विधायकाभावात्केन सूत्रेण ख-प्रत्ययेनादेशावित्यस्य सर्वथा वक्तुमनर्हत्वात । एवञ्च कालीन इति न्यायानुयायि-नामुच्चारणे हठमात्रमपाणिनीयत्वात् । । कन्तु तत्तत्कालिक इत्येवं सर्वैर्वाच्य-त्वादिति दिक् ।

## प्रतिबध्य इति—

न्यायग्रन्थेऽधिकांशेनैवम्विधो लेख उपलभ्यते प्रतिबध्यप्रतिबन्धकभाव इति । प्रतिबन्धकतावादनामको ग्रन्थोऽपि वर्त्तते । प्रतिपूर्वकबन्ध बन्धन इति धातुस्तस्मा-"हहलोर्ण्यदि"ति ण्यति प्रतिबन्ध्य इति जाते नलोपविधायकसूत्राभावात्पृषोदरा-दित्वम्प्रकल्प्य तत्र निपातनान्नलोपे प्रतिबध्य इति ।

अत्र सरयूपारीणशुक्लाः निपातनान्नलोपविधाने प्रमाणाभावात्तस्या-गतिकगतित्वाच्च प्रतिबन्ध्यप्रतिबन्धकइत्येव रूपमिति वदन्ति ।

## कालान्तरीण इति—

कालान्तरशब्दादपि खप्रत्ययविधायकं सूत्रं किमपि नास्तीति नैयायिकानु-यायिनामिदमपि साहसमात्रमेव किन्तु कालान्तरशब्दाद् "गहादिभ्यश्छ" इति सूत्रेण छप्रत्यये "आयनेयी"ति ईयादेशे "यस्येति चे"ति लोपे कालान्तरीय इत्येवं रूपम् ।

यत्र शाब्दिकास्तत्र तार्किका यत्र तार्किकास्तत्र शाब्दिका यत्रचोभयन्तत्र नोभयमिति लोकन्यायेन स्वाच्छन्द्यमनुसन्दधाना पाणिनीयविरुद्धमपि केचि-त्प्रयुञ्जते । परम्प्रत्ययवयन्त्येव ते इति सरयूपारीणशुक्लानाम्भावना ।

## चैत्रो मैत्रो देवदत्तश्च गच्छन्तीति—

चन्द्रे कलङ्कस्सुजने दरिद्रता विकासलक्ष्मी कमलेषु चञ्चला । मुखाऽप्रसाद-स्सघनेषु सर्वदा यशो विधातु कथयन्ति खण्डितम् ॥

इति शिष्टवाक्येऽनेकैकवचनान्तसत्त्वेऽपि बहुवचनान्तमेव कथयन्तीति क्रिया-

पदम् । नचैकवचनस्य द्वित्वबहुत्वबोधकप्रत्यये लक्षणेति तात्पर्येण कथयन्तीति बहुवचनमिति वाच्यम् । सुविभक्तौ न लक्षणेति सिद्धान्तात् । अत्र प्रमाणन्तु "कर्तृकर्मणोः कृती"ति सूत्रमन्यथा लक्षणया शेषषष्ठ्यैव कर्तृत्वकर्मत्वलाभे पृथक् तद्विधानं व्यर्थमापद्यते ।

नच "न बहुव्रीहौ द्वन्द्वे चे"ति सूत्रे बहुव्रीहाविति सप्तम्याः प्रथमार्थकत्वदर्शनेन कथन्न सुब्विभक्तौ लक्षणेति वाच्यम् ? सूत्राणां छान्दसत्वेन तत्र तत्स्वीकारात् । एवञ्च घटः पटश्च स्तः देवदत्तेन यज्ञदत्तेन च घटौ क्रियेते इत्येवम्विधमेव प्रयोक्तव्यम् ।

## पदमिति—

पदशब्दो द्विविधः साङ्केतिकः यौगिकश्च । तत्र "सुप्तिङन्तं पदमि"ति पाणिनिसूत्रबलेनाद्यस्सांकेतिकः । पद्यते गम्यतेर्थोऽनेनेति पदम्वाक्यमिति यावत् । लोकेऽर्थबोधनार्थमेव वाक्यप्रयोग इति सिद्धान्तात् । द्वितीयो यौगिक इति । शक्तिरस्त्यस्मिन्निति शक्तम्पदमित्यार्थिकाः । पदत्वं शक्त्याश्रयत्वमिति यावत् ।

## स च त्वञ्च अहञ्चेति—

एवमर्थाभिप्रायेणास्मच्छब्दस्योत्तरकोटिनिष्ठत्वात् प्रधानत्वाच्च अहम्भवामि वयं भवाम इत्येव रूपम् ।

चन्द्रिकाकारास्तु "युगपत्प्राप्तौ परः" इति सूत्रम्प्रणिन्युः । तत्सर्वथैवानुक्तम् ।

## परिष्कार इति—

परिपूर्वककृधातो "सम्परिभ्यां करोतौ भूषणे समवाये च" इति भूषणेऽर्थे सुट् "भावे" इतिघञि वृद्धौ षत्वे परिष्कारो भूषणमित्यर्थः । समवायस्सङ्घातः तत्र सुट्यपि परिष्कार इत्येव । सङ्घातस्समूह इत्यर्थः । परिष्कारशब्दस्य समूहोऽप्यर्थः ।

## प्रश्नशब्दे सम्प्रसारणं कुतो नेति—

"कतर कतमौ जातिपरिप्रश्ने" प्रश्ने चासन्नकाले" इति(१) सौत्रप्रयोगात्संप्रसारणाभावः । नच "छन्दोवत्सूत्राणी"ति भाष्यात्तत्र संप्रसारणाभावः? तस्यागतिकगतित्वादसार्वत्रिकत्वाच्च ।

---

(१) अत्र "अनन्त्यस्यापि प्रश्नाख्यानयोः" इति निर्देशोऽप्यनुसन्धेयः ।

किञ्च सम्प्रसारणमिति संज्ञा "संज्ञापूर्वको विधिरनित्य" इति परिभाषया संप्रसारणन्न। न च भाष्ये तस्यासत्त्वम् लक्ष्यानुरोधेन क्वचित्तदाश्रयणात्।

## जागर्त्तिरिति—

जागृ निद्राक्षय इति धातुस्तस्मात् क्तिनि "जाग्रोऽविचीति" गुणे जागर्त्तिरिति भवति नतु जागृतिरिति ? एवं प्रयोक्तारो भ्रान्ता एव ?

## छात्राणां हसितम्—

ननु क्तान्तयोगे 'नलोके'ति षष्ठीनिषेधात् कथं छात्राणामिति प्रश्नः ? "नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यानामि"ति भाष्यवार्त्तिके तद्विधानात्। नच शेषत्वविवक्षया तत्प्रत्याख्यानम्। तावतापि भाष्योक्तस्थले षष्ठीश्रुतेरनिवार्य्यत्वात्।

## लिखनमिति—

लिख अक्षरविन्यासे "गाङ्कुटादिभ्योऽञ्णिन्ङिदि"ति संज्ञया निषेधविधानम्। अतो न गुणश्रुतिः।

ननु कुटादिगणे लिख धातोः पाठो नास्तीति कथं ङित्संज्ञया निषेध इति चेन्न ? कुट् आदिर्येषां ते कुटादयः कुटस्यादिःकुटादिः कुटादिश्च कुटादयश्च कुटादय इति समासद्वयम्। यद्यपि बहुव्रीहिपक्षे न लिखतेः प्रयोगस्तथापि तत्पुरुषपक्षे कुटः प्रागेव लिख धातोः पाठ इति ङित्संज्ञया निषेधविधानात्।

अत्र मान्याः "रलोऽव्युपधाद्धलादेरि"ति भाष्यप्रयोगः वृत्तिग्रन्थप्रयोगश्च लेखित्वा लिखित्वा लिलेखिषति लिलिखिषति "अपाच्चतुष्पाच्छकुनिष्वालेखने" इति सौत्रप्रयोगश्च। एवञ्च लिखधातोर्न कुटादित्वमिति वदन्ति।

अत्र विलक्षणं किञ्चित्—येनानुभूतन्तेनैव स्मर्यते यदनुभूततन्तदेव स्मर्यते अत्र तत्तत्पुरुषतत्तद्व्यक्तित्वनिवेशः। ननु अनुभवस्मरणयोस्सामानाधिकरण्येन कार्यकारणभावः अनुभवज्ञानस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वात् स्मृतेश्च कालान्तरभावित्वात् स्मृत्यव्यवहितप्राक्क्षणवृत्तित्वस्यानुभवस्येति कथमनुभवस्मरणयोः कार्यकारणभाव इति प्रश्नः ? अनुभवजन्यस्वविषयकसंस्कारवत्तासम्बन्धेनानुभवस्मरणयोः कार्यकारणभावात्। स्वविषयकसंस्कारवत्ता चात्मनि अनुभवसंस्कारस्मरणानां समानविषयकत्वम् चरमस्मृत्या रोगादिना कालान्तरेण वा संस्कारनाशः इति स्फोटनात्।

## एषोऽर्घस्सूर्याय नम इति—

अत्र नमश्शब्दार्थस्त्यागो ननु करशिरस्संयोगरूपः। तदुद्देश्यत्वञ्चतुर्थ्यर्थः, त्यागस्य यत्किञ्चित्कर्मकत्वेन प्रसिद्धिः। तत्रान्यस्मिन्कर्मत्वाभावात् अर्घ एव कर्मत्वम्। तथाच एतदर्घकर्मकसूर्य्योद्देश्यकस्त्याग इति शाब्दबोधः।

ननु कर्मसंज्ञायां द्वितीयापत्तौ एनमर्घं सूर्यायेति कुतो नेति प्रश्नः? क्रियये-प्सिततमे पदार्थे सति कर्मसंज्ञया द्वितीयाश्रुतिरिह क्रियावाचकपदाभावादक्षतेः।

## माभवतु—

ननु निषेधार्थकमाशब्देनैव तद्रूपसिद्धावपि निषेधार्थकमाशब्द एव नास्ति "न माङ्योग" इतिसूत्रीयभाष्यात्। एवञ्चैवं प्रयोगा अशुद्धा एव किन्तु माभवान् भूदित्येवं लुङ्विशिष्टा एव।

## अजा गावो महिष्यश्च विचरन्त्यो वनाद्वनम्—

ननु भागवतश्लोके कृष्णकर्तृकगोचारणे कथमजामहिष्योः प्रयोग इति प्रश्नः? "प्रसूता महिषी प्रोक्ता ह्यप्रसूता त्वजा मते"ति सिद्धान्ताद् व्यासोक्ते-स्सौष्ठवात्।

इति जौनपुर वदलापुर उदयपुरगेलहवाभिजन व्युत्पत्तिवादशास्त्रार्थकलापरिभा-षेन्दुशास्त्रार्थकला वैयाकरणभूषणशास्त्रार्थकला कौमुदीकल्पलतिका परि-ष्कारदर्पणप्रभृति विंशत्यधिकग्रन्थनिर्माणकर्त्रा सुप्रसिद्धशास्त्रार्थ-दिग्गजेन घटिकाशतकशतावधानाशुकव्याद्यनेकपदवीकक्रवि-चक्रवर्त्ति पण्डितराजशुक्लश्रीवेणीमाधवशास्त्रिणा रचिता प्रयोगशास्त्रार्थकलासमाप्ता।

# वाक्यपदीय

न्याय–व्याकरणाचार्य

## पं० श्रीसूर्यनारायणशुक्लजी कृत

## भावप्रदीपव्याख्या, टिप्पणी सहित।

व्याकरणाचार्य परीक्षा में प्रविष्ट वाक्यपदीय का ब्रह्मकाण्ड कितना कठिन है यह बात प्रत्येक शास्त्रानुरागि को विदित ही है। इस ग्रन्थ का महत्व कैयट तथा नागेशभट्ट प्रभृति महाभाष्य के समान आदर करते हैं। अन्य दर्शनों के पण्डित भी इसका बहुत ही आदर करते हैं। वैयाकरणों का स्फोटवाद इसी ग्रन्थ के ऊपर अवलम्ब रखता है। इस ग्रन्थ की प्राचीन हेलाराजकी एक टीका मिलती है जोकि अत्यन्त कठिन होनेके कारण छात्रों को समझ में नहीं आती। इस लिए मैंने काशी गवर्नमेन्ट संस्कृत कालेज के अध्यापक न्याय—व्याकरणाचार्य पण्डित श्रीसूर्यनारायणशुक्लजी से प्रार्थना कर इसकी परीक्षोपयोगी सरल तथा विस्तृत भावप्रदीप टीका तथा टिप्पणी बनवाकर आप लोगों के सेवामें समर्पित करते हैं इस टीका में टीकाकार ने न्यायतात्पर्यटीका प्रशस्तपादभाष्य श्लोकवार्तिक शाङ्करभाष्य प्रभृति ग्रन्थों की तथा कैयट विवरण की सहायता लेकर वैयाकरण सिद्धान्त को ठीक समझाने की चेष्टा की है। टीका के विस्तृत होने पर भी श्लोकार्थ को स्फुट करने के लिए टीकाकार ने पहिले टीका में श्लोक का अर्थ लिख कर विशेष वक्तव्य अयंभावः इत्यादि लेखों से लिखा है। नागेश तथा हरिका जहां स्फोट के जन्यत्वाजन्यत्व वाक् के चातुर्विध्यत्रैविध्य में मतभेद है उसे स्फुट दिखाया गया है। मुझे दृढ विश्वास है कि आप पुस्तक को देखते ही प्रसन्न होंगें।
मूल्य बहुत सस्ता केवल १) विद्यार्थियों को कमीशनकाट कर ।।।-) में मिलेगा॥

---

१ फक्किकारत्नमञ्जूषा। सिद्धान्तकौमुदीस्थपङ्क्तिव्याख्यानरुपा।
प्रथमभाग २) द्वितीयभाग २) सम्पूर्णका रु० ४)

२ फक्किकाप्रकाश। टिप्पणी सहित। फक्किकका ग्रन्थोंमें अत्यन्त उपयोगी।
मूल्य १।)